गादाधरी

विधिनिषेधार्थवादभेदेन वाक्यं त्रिविधम् । तत्र प्रवर्तकं वाक्यं विधिः ।

विधिबोधिनी ।

विश्वपं शिवतनुं परात्परं
सिद्धिदं सकलकृत्य-साधकम् ।
शङ्करं निखिलविश्वशङ्करं
नौमि भक्तसुखदं परेश्वरम् ॥ १
प्रवृत्तिरूपोऽपि निवृत्तिमार्गगो
निन्दाप्रशंसादिषु तुल्यतां गतः ।
वाक्यस्वरूपोऽपि प्रवर्तनात्मको
वन्द्यो विधिः स्वर्गमभीसुभिर्मुदा ॥२
गुर्वोः श्रीयामिनीकान्त-श्रीकालीपदपादयोः ।
नत्वा श्रीयादवेन्द्रेण क्रियते विधिबोधिनी ॥३

अथ दुःखपङ्कनिमग्नं जगदिदमुद्दिधीर्षुः परमकारुणिकः कविर्गदाधर-भटाचार्य "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतिमनुसरन् आत्मदर्शनस्य श्रवणादिद्वारा आत्यन्तिकदुःखनिवृत्तिप्रयोजकत्वेन श्रवणस्य च "श्रोतव्यः श्रुतिवाक्येभ्य" इतिस्मृतेः श्रुतिवाक्य-विचारसाध्यत्वेनानुस्मरंश्च वेदप्रामाण्यं वेदस्य चाचारमूलकत्वेनाचारस्य च जनकतासम्बन्धेन प्रवर्तकज्ञानत्वेन प्रवर्तकज्ञानं निरूपयितुं भुमिकामारचयति विधिनिषेधेत्यादिना । तत्रादौ विधिशब्दप्रयोगाच्छिष्टाचारपरिप्राप्तमवश्यकर्तव्यताकं मङ्गलमप्याचरितमिति न ग्रन्थकृते न्यूनतेति सूचितम । विधिशब्देन स्वयम्भुवः स्मरणादिति भावः ।

विधिबोधिनी।

तत्र "मन्त्रब्राह्मणयोर्वेदनामधेयम्" (आ: परि: १।३३) इति वेदस्य मन्त्रब्राह्मणात्मकतया मन्त्रस्य चानुष्ठानोपकारक-द्रव्यदेवतादिलिङ्गस्मारकवेदभागत्वेन कर्तव्ये यागाद्यनुष्ठान एव तदुपयोगितया तत्प्रविहाय कर्तव्यानुष्ठानबोधकप्रवर्तकज्ञानमादौ निरूप्यत इति हृदयम्।

एतेन विधिनिषेधात्मकस्य वाक्यस्य तच्छेषीभूतस्य चार्थवादस्य ब्राह्मणान्तर्गतत्वेन निरूपिते ब्राह्मणेऽग्रे च वक्ष्यमाणे मन्त्रतत्त्वार्थे कृत्स्नमेव वेदतत्त्वार्थं समासतोऽत्र प्रदर्श्यत इत्यपि सूचितम्। तच्च विधायकवाक्यरूपं ब्राह्मणं विधिनिषेधार्थवादभेदात् त्रिविधम्। ब्राह्मणञ्च मन्त्रेतरवेदभागः (ऋग्वेः भाष्य उपोः)। जैमिनिस्तु "तच्चोदकेषु मन्त्राख्या" (जैः २।१।३२) "शेषे ब्राह्मणः शदः" (जैः २।१।३३ सूः)। तथाच मन्त्रब्राह्मणयोर्वेदरूपत्वान्मन्त्रभिन्नस्य वेदभागस्य सुतरां ब्राह्मणत्वम्। तल्लक्षणंतु "नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्। प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥ (याज्ञवल्क्यः) अत्र च वातस्यायनभाष्यम् त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि विधिवचनानि अर्थवादवचनानि अनुवादवचनानि चेति (वातस्या २।१।६१)।

य एव लौकिकास्त एव वैदिका इति न्यायादुपक्रमते "ओदनकाम इति।

ओदनकामः चेतेतिलौकिकप्रवर्तकविधिवाक्यवदलौकिकानामपि स्वर्गकामो यजेतेत्यादिवेदवाक्यानां प्रवर्तकलिङादिज्ञानात् प्रवर्तकं यत् कर्तव्यताज्ञानं तज्जननेन तेषामपि विधिवाक्यत्वमव्याहतम्। तथा चैतद्वाक्यश्रवणा-(ज्ञाना) नन्तरं पुरुषो वेदो वा जनमेतत् कर्म कर्तु प्रवर्तयतीति बोधः समुपजायते। ततश्च तस्मिन् कर्मणि प्रवृत्तिर्भवति जनानामिति संक्षेपः।

अत्र विधिशब्दस्य विधिघटितवाक्ये प्रयोगदर्शनाद्व यद्वाक्यं विधायकं चोदकं प्रवर्तकं स विधिरित्यर्थो लभ्यते। "चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः" (भाट्टाः)। प्राभाकरास्तु 'प्रवर्तकं वेदवाक्यं चोदना। तथाच चोदनालक्षणोऽर्थो धर्मः (जैः सूः १।१।२) इत्यादौ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्यमित्याहुः (लो· भा·)। प्रवृर्तकशब्दश्चोदना' (जेः सू· वृ· अ· १पा· १० सू· २) चोदना कर्मोत्पत्तिवाक्यम् (जै· सू· वृ· अ· २० पा· २ सू· १६) भाट्टास्तु प्रेरणा फलभावना। यथा स्वर्गकामो यजेतेत्यादौ लिङाद्यर्थाभिधारूपा चोदनेत्याहुः। चोदना च प्रवर्त्तना—। प्रवृत्तिहेतुरित्यर्थः "ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदने" त्यादा—(गीता) विष्टसाधनत्वज्ञानम् इष्टसाधनं कर्म चैतज्ज्ञानाश्रयश्चेत्ति त्रिविधा कर्मचोदना भवतीति श्रीधरव्याख्यादर्शनात्। यथा एकं वा संयोगरूपचोदनाख्याविशेषात् (जै· सू· २।४।१) इतिसूत्रे पुरुष-(कृतयागादि) प्रयत्नश्चोद्यत इतिशवरभाष्यप्रामाण्याच्च। तथाच मीमांसका अज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थं प्रमाणान्तरेणाप्राप्तं विधत्ते।

गादाधरी

"ओदनकामः पचेत स्वर्गकामो यजेतेत्यादिलौकिकालौकिकवाक्यानां प्रवर्त्तक-कर्तव्यताज्ञानजननेन प्रवर्तकत्वाद् विधित्वम् ।

विधिबोधिनी ।

यथाऽग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिवाक्यं मानान्तरेणाप्राप्तं स्वर्गप्रयोजनवदग्निहोत्रनामकं होमं विधत्ते । अग्निहोत्रनामकेन होमेन स्वर्गं भावयेदिति वाक्यार्थबोध इत्याहुः । न्यायनये इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यम् (न्यायसूत्रवृत्तिः २।१।६३), विध्यभिधायक-प्रत्ययस्तद्घटितवाक्यं वा (न्यायमञ्जरी) विधीयते विधिरूपशब्देन प्रतिपाद्यतेऽसौ विधिरिष्टसाधनत्वादिः । तस्याभिधायको वाचक इत्यर्थः । प्रत्ययश्चार्थविशेषाभिधायको लिङ्-लोट्-लेट्-तव्य-कृत्यप्रत्ययादिरूपः । तद्घटितं वाक्यमपि विधिशब्दार्थः । तान्त्रिकाणां यजेतेत्यादिलिङाद्विघटितवाक्ये विधिशब्दप्रयोगदर्शनात् । न तु केवले प्रत्यय इत्यभिप्रायेणैव प्रवृत्तिपरस्य वाक्यस्य विधित्वम् । यजेत पचेतेत्यादिविधिप्रत्ययघटितवाक्यादिष्टसाधनत्वोपस्थापना दोदनकामः पचेत स्वर्गकामो यजेतेत्यादिलोकिकालौकिकवाक्याभ्यां यथाक्रमं पाक ओदनरूपेष्टसाधनं यागः स्वर्गरूपेष्टसाधनमित्यर्थो बोध्यते । भट्टाचार्य्यमते प्रवर्तकज्ञानविषयो धर्मो विधिः । स च धर्मो न्यायनये कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्व—(अजनकत्व)—सहितमिष्टसाधनत्वञ्च । ओदनकामः पचेत स्वर्गकामो यजेतेत्यादावोदनस्वर्गादिरूपं यत्फलं तत्साधनत्वं पाकयागादि-क्रियायां प्रतीयते ।

गादाधरी ।

अथ तरति मृत्युं तरति ब्रह्महत्यामित्याद्यर्थवादानामपि फलसाधनताबोधद्वारा प्रवर्तकतया तत्रातिप्रसङ्गः । न च कर्तव्यताबोधकवाक्यत्वं विधित्वं, तच्च नार्थवादानामिति वाच्यम् । पाकं कुर्वीत यागं कुर्वीतेत्यादिवाक्यासंग्रहात । नहि तत्र कृतिसाध्यत्वरूपं कर्तव्यत्वं प्रतीयते ; धात्वर्थकृतौ कृतिसाध्यत्वबाधेन लिङा

गादाधरी ।

तद्बोधनासम्भवात् । न च तत्र धातुना कृति द्वितीयया च साध्यत्वरूपं कर्मत्वं प्रत्याय्यत इति कृतिसाध्यताबोधकत्वमनपवादकमिति वाच्यम् । तर्हि पाकं करोतीति यागं करोतीति वाक्यानामपि दर्शितरीत्या कृतिसाध्यताबोधकत्वेन तादृशार्थवादातिप्रसङ्गात् । तत्र विषयत्वरूपं कर्मत्वं नतु जन्यत्वरूपं साध्यत्वं प्रतीयते इति चेदुच्यते, तदा पाकं कुर्वीतेत्यादावपि विषयत्वमेव कर्मत्वमित्य-विशेषो दुर्वार एव ।

विधिबोधिनी ।

तादृशफलानां च तत्तद्रूपेण लिङादिशक्यतावच्छेदककोटिप्रवेशे शक्यानन्त्यं; सर्वसाधारण्येन व्युत्-पत्त्यनुदयेनापूर्वफलसाधनत्व-बोधनिर्वाहश्चेतीष्टत्वेन तेषामनुगमः। इष्टत्वञ्च समभिव्याहृतपदोप-स्थापितकामनाविषयत्वम् । अतः स्वर्गकामःप चेतेत्यादौ शक्तिभ्रमशून्यस्य नोदनादिसाधनत्वधीर्नवा तत्तात्पर्य्येण तथाविधप्रयोगः प्रामाणिकानाम् । इष्टत्वज्ञानस्याप्रवर्तकत्वेऽपि शक्यफलानुगमार्थं तस्य शक्यता । वस्तुतस्तु अशक्यस्यैव तस्य शक्यानुगमकता सर्वनामस्थले बुद्धिस्थत्ववत् ; तेन रूपेण फलानां सङ्केतविषयतां विना शक्त्यैक्यासम्भवात् । तस्य सङ्केतविषयत्वोपगमेऽपि यथा न तस्य वाच्यता तथा स्वकृतशक्तिवादे प्रपञ्चितम् । तथाचेष्टत्वोपलक्षितधर्मावच्छिन्नसाध्यत्वं लिङ् बोधयतु" इत्येवं सङ्केतविषयत्वेऽपि न वाच्यत्वमित्यर्थः ।

प्रवर्तकफलसाधनताबोधमात्रस्य विध्यर्थत्वे दोषमाशङ्कते अथ तरतीति । फलमुद्दिश्यैव जनानां प्रवृत्तिदर्शनादत्र मृत्युब्रह्महत्यादितरणरूपफलसाधनताबोधद्वारा लिङाद्यघटितवाक्यादपि प्रवृत्त्यापत्तेः । अर्थवादानां च विधिवाक्यैकवाक्यतया प्रामाण्यान्न तेषां साक्षाद् विधित्वमित्यलक्ष्येऽ-र्थवादवाक्येऽतिप्रसङ्ग इति भावः । विधिस्वरूपनिरूपणाय पूर्वपक्षमुत्थापयति न चेति । कर्तव्यताबोधकलिङादिघटितवाक्यस्य विध्यर्थत्वे तरति मृत्युमित्याद्यर्थवादवारणसम्भवेऽपि पाकं कुर्वीत्येत्याद्यसंग्रहादव्याप्तिरित्यर्थः । कर्तव्यत्वञ्च कृतिसाध्यत्वरूपम् । तथाच कृधात्वर्थकृतौ लिङर्थस्य कृतिसाध्यत्वस्य बाधेन तद्बोधनासम्भवात् । पुनराशङ्कते न च तत्रेति । कृधातुना कृतिर्द्वितीयया साध्यत्वरूपं कर्मत्वं बोध्यत इति नान्वयानुपपत्तिः । तथासति "पाक" मितिभागत-एव कृतिसाध्यत्वप्रतीतेरविशेषात् पाकं करोतीति लिङघटितवाक्यस्थलेऽर्थवादादौ पुनरति-व्याप्त्यापत्तेरितिभावः । तत्रेति । पाकं करोति यागं करोतीत्यादिवाक्ये । पाकमित्यादौ द्वितीयया न केवलं विषयत्वरूपकर्मत्वविवक्षणादपि निस्तारः ;

गादाधरी ।

वस्तुतः पाकानुपधायकतद्विषयककृत्युत्तरकाले पाकं चकारेत्यादिप्रयोगविरहात् कृतिसाध्यत्वमपि तत् कर्मताघटकमतो दुर्वार एवातिप्रसङ्गः । न च प्रवृत्तिजनक-कृतिसाध्यताधीजनकवाक्यत्वं तत् । पाकं करोतीतिवाक्यजन्यकृतिकर्मता-बोधस्याप्रवर्तकत्वान्नातिप्रसङ्ग इति वाच्यम् । तादृशवाक्यजन्यज्ञानस्य कृति-साध्यताविषयकत्वे प्रमाणान्तराधीनेष्टसाधनताज्ञानसहकारेण तस्य प्रवर्तकताया दुर्वारत्वात् ।

विधिबोधिनी ।

तत्र कृतिसाध्यत्वमवश्यं कर्मताघटकत्वेन वाच्यमिति "वस्तुत" इत्याद्युत्तरग्रन्थेन प्रदर्शनादतिप्रसङ्ग पुनर्वजूलेपायते । "पाकानुपधायकेति पाकरूपफलानुपधायक इत्यर्थः । तद्विषयकेति पाक-विषयक इत्यर्थः । तथाच पाकरूपफलाजनकस्थाल्याद्यानयनतण्डुलप्रक्षालनादिपाकविषयक-कृत्युत्तरकाले कृत्या पाकस्यानिष्पन्नत्वेन पाकं चकारेत्यादिप्रयोगासम्भवात् कर्मताघटकत्वेन कृति-साध्यत्वमपि वाच्यमेवेति तातपर्य्यम् । नचेति । तदिति । प्रवर्तकत्वमित्यर्थः । पाकं करोतीत्यादौ कृतिसाध्यताबोधस्य लिङाद्यघटितत्वेनाप्रवर्तकत्वादित्यर्थः । प्रमाणान्तराधीनेति । तृप्त्यादिहेतुना भोजनस्येष्टसाधनत्वानुमानात् पाकं करोतीतिवाक्यादपि प्रवृत्यापतेः । सिद्धान्तं प्रदर्शयति । उच्यत इत्यादिना । विधिर्नाम विधिप्रत्ययार्थः । इष्टसाधनतेति । इष्टत्वंच समभिव्याहृतपदो-पस्थापितकामनाविषयत्वम् । यथा—ओदनकामः पचेत स्वर्गकामो यजेतेत्यादावोदनस्वर्गरूप-फलयोरिष्टत्वमिति—

गादाधरी ।

उच्यते इष्टसाधनताबोधकवाक्यं विधिः । पाकं कुर्वीतेत्यादिवाक्यं च धात्वर्थकृता-विष्टसाधनताबोधं पचेतेत्यादिवाक्यं च धात्वर्थपाकादौ तद्बोधकं, सर्वत्र विधिप्रत्ययस्येष्टसाधनताबोधकत्वात् ।

न च न कलञ्जं भक्षयेदित्यादिनिषेधेऽतिव्याप्तिस्तस्यापि कलञ्जभक्षणाभावे नर-कानुत्पादकरूपेष्टसाधनताबोधकत्वादिति वाच्यम् । क्रियाविशेषणतयैव

गादाधरी ।

विधिप्रत्ययस्येष्टसाधनताबोधकत्वव्युत्पत्तेः। निषेधस्थले च बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावस्यैव क्रियायां बोधोपगमात्। क्रियाविशेषणीभूताभावविशेषणत्वेऽपि परम्परयैवेष्टसाधनत्वस्य क्रियाविशेषणत्वेन उक्तव्युत्पत्त्यभङ्गात्।

विधिबोधिनी ।

व्युत्पत्तिवादे स्वयमेवोक्तत्वात्। कलञ्जमिति। कलञ्जोऽभक्ष्यमांसविशेषः। तथाचोक्तं माधवाचार्य्यैर्न्यायमालायां 'विषाक्तशराग्रेण विद्धा ये पशुपक्ष्यादयस्तेषां यन्मांसंतदेव कलञ्जमिति। "विषाक्तेनैव वाणेन हतौ यौ मृगपक्षिणौ। तयोर्मांसं कलञ्जं स्याच्छुष्कमांसमथापिवा"। ताम्रकूटमथापिवेति चतुर्थपाद इति केचिदित्याद्यभियुक्तोक्तेः। रक्तलशुनं कलञ्जमिति हरदत्तः। निषेधस्य विधिरूपत्वाभावादलक्ष्यत्वेनातिव्याप्तिरितिभावः। निषेधस्यापि विधिरूपत्वे विधिनिषेधार्थवादभेदेन वाक्यस्य त्रिविधविभागत्वानुपपत्तेः। विभागस्य परस्परविरुद्धतद्व्याप्यत्वपुरस्कारेण धर्मिप्रतिपादनरूपत्वादिति।

गादाधरी ।

अथैवमप्यभावविशेषणतयेष्टसाधनताबोधकत्वमादायैव निषेधेऽतिप्रसङ्गो दुर्वारः। आश्रयतासम्बन्धेन इष्टसाधनताप्रकारकबोधजनकत्वनिवेशेऽप्याश्रयतया तद्विशिष्टपाकादिबोधकतदादिपदघटितवाक्येऽतिप्रसङ्गः। धातूपन्थाप्यार्थे साक्षाद् विशेषणतयेष्टसाधनताबोधकत्वविवक्षणे पाण्डित्यकामो जन्मतिथावामिषं न भुञ्जीतेत्याद्यभावविधावव्याप्तिरिति चेन्न।

विधिबोधिनी ।

क्रियाविशेषणतयैवेति। एवं चेष्टसाधनताबोधं प्रति साक्षात्क्रियाविशेषणतयैव विधिप्रत्ययस्य कारणत्वमिति भावः। यजेत्येत्यत्र यागेनेष्टं भावयेत् पचेतेत्यत्र पाकेनेष्टं भावयेत् कुर्वीतेत्यत्र पाकेनेष्टं साधयेदित्यादिरूपेण विध्यर्थेष्टत्वस्य विशेषणत्वेन यजिप्रभृतिक्रियास्वन्वयादिति। निषेधस्थले चेत्ति। बलवदित्यादि। विधिप्रत्ययस्य बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वे चैका शक्तिर्न युक्ता; किन्तु बलवदनिष्टाननुबन्धित्वम् इष्टसाधनत्वं कृतिसाध्यत्वंचेति त्रिषु पृथगेव शक्तिरिति नव्याः। बलवदनिष्टाननुबन्धित्वं चात्र नरकाजनकत्वं पापाजनकत्वं वेति शब्दशक्तिप्रकाशिकाटीकाकृतः। तथाच न कलञ्जं भक्षयेदित्यादौ बलवदनिष्टाजनकत्वं विध्यर्थस्तदभावो नञात्र बोध्यते। व्युत्पत्तिभङ्गमत्र निराकरोति। परम्परयेति। स्वप्रकारतानिरूपितप्रकारतावत्त्वसम्बन्धेनेत्यर्थः।

गादाधरी ।

आश्रयतासम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वस्य विवक्षणीयत्वात्। जन्मतिथावामिषं न भुञ्जीतेत्यादावामिषभोजनाभाव इष्टसाधनमितिबोधे आश्रयतयैवाभावे प्रत्ययोपस्थापितेष्टसाधनतान्वयः। न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभाववदित्यादिबोधे च नाश्रयतयेष्टसाधनतान्वयः। उक्तव्युत्पत्तिस्त्वप्रामाणिकीति भावः।

विधिबोधिनी ।

अतिप्रसङ्गो दुर्वार इति। इष्टसाधनत्वादिविशिष्टपाकादिबोधकतदादिपदघटितवाक्ये इत्यर्थः। तच्च वाक्यं तदिष्टसाधनमित्यादिरूपम्। आश्रयतासम्बन्धेनेत्यादि। प्रत्ययोपस्थापितं यदिष्टसाधनत्वं तेनाऽन्वितो यः स्वार्थः, ततपरं तद्बोधकं यतपदं तद्घटितवाक्यत्वस्येत्यर्थः। तथाचाश्रयतासम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनान्वितस्वार्थबोधकपदघटितवाक्यत्वमिति विधिलक्षणं पर्य्यवसितमित्यर्थः। जन्मतिथावमिषं न भुञ्जीतेत्यादावामिषभोजनाभाव इष्टसाधनमितिबोधे आश्रयतासम्बधेनैवाभावे प्रत्ययोपस्थापितस्येष्टसाधनत्वस्यात्वयः। न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभाववदित्यादिबोधे च नाश्रयतासम्बन्धेनेष्टसाधनतान्वयः। क्रियाविशेषणतयैवेत्यादिव्युतपत्तिस्त्वप्रामाणिकीति भावः।

जरन्नैयायिकास्तु प्रवर्तकज्ञानविषयो धर्मो विधिः। स च धर्मः—

गादाधरी ।

न च क्रियाकर्य्यतामात्रस्य विधिप्रत्ययार्थवादिमीमांसकानां मते स्वर्गकामो यजेतेत्यादि सकलविधीनामेव वैतल्लक्षणेन संग्रहः। यत इष्टसाधनताया विधि-

गादाधरी ।

त्वानभ्युगमे पाकं कुर्वीत पाकं करोतीति वाक्यजन्यबोधाविशेषेण एकस्य प्रवर्तकता नापरस्येत्यनुपपत्तेः, तन्मतं विचारासहमेव

विधिबोधिनी ।

कृतिसाध्यत्वे सति बलवदनिष्टाजनकत्वसहितमिष्टसाधनत्वम् । अत्र कृतिसाध्ये तृप्तिरूपसुखात्मकेष्टसाधने च मधुविषसंपृक्तान्नभोजने प्रवृत्तिवारणाय बलवदनिष्टाजनकत्वविशेषणं देयमेव । बलवदनिष्टं तु मरणम् । यदा तु तादृशभोजनमपि बलवदनिष्टाननुबन्धित्वेन ज्ञायते तदा तत्र प्रवृत्तिर्भवत्येव । न कलञ्जं भक्षयेदित्यादौ नञा बोध्यमानः (कृतिसाध्यत्वविशिष्टस्य बलवदनिष्टाजनकत्वविशिष्ट स्येष्टसाधनत्वस्याभावो) विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यतीति बलवदनिष्टाननुबन्धित्वरूपो विध्यर्थः पर्य्यवसित इत्याहुः ।

प्रभाकरगुरोर्मतं दूषयितुमुपक्रमते न च क्रियाकार्य्यतामात्रस्येति । प्राभाकरास्तु कार्य्यतामात्रं विध्यर्थइत्याहुः । कार्य्यताज्ञानस्य प्रवर्तकत्वात् । कार्य्यताज्ञानञ्च कृतिसाध्यताज्ञानम् । कार्य्यताज्ञानं प्रवर्तकमितिगुरव इति तत्त्वचिन्तामणिः । न च कृतिसाध्यताज्ञानं विनापि घटयागपाकादिकर्त्तुंस्तदुपायकपाल–हविस्तुण्डुलादिसिद्धविशेष्यकप्रवृत्तिदर्शनाद्व्यभिचार इति वाच्यं, सिद्धं साध्यं फलञ्चेति प्रवृत्तेर्विषस्त्रिधेतिप्रवृत्ते विषयता त्रयी । एका साध्यत्वाख्यविषयता, सा च यन्निष्ठकृतिसाध्यताज्ञान–चिकीर्षादिना प्रवृत्तिस्तन्निष्ठा, तच्च घट–याग–पाकाद्येव नतु तज्जनकीभूत कपालादिसिद्धनिष्ठा, अतएव घटं करोति यागं करोतीत्येवानुव्यवसायव्यवहारौ, न त कपालहविरादेः सिद्धदशायां कपालं करोति, हविः करोतीत्यनुव्यवसायो व्यवहारो वा, कृतिवाचिधातुयोगे द्वितीयायाः साध्यत्वाख्यविषयतार्थकत्वनियमात् । अपरा उपादानत्वापरनाम्नी सिद्धत्वाख्यविषयता, सा च सिद्धकपालहविस्तण्डुलाद्युपायनिष्ठा कपालेन घटं करोमि हविषा यागं करोमीत्यनुव्यवसायात् । तत्र चोपादानाख्यविषयताया एव तृतीयार्थत्वात् ; तस्य च धात्वर्थे कृतावन्वयस्य व्युत्पन्नत्वात् अन्या च फलत्वापरनाम्नी उद्देश्यत्वाख्यविषयता । सा च यत्साधनताज्ञानाधीना चिकीर्षा तन्निष्ठा, तच्च जलाहरणमुद्दिश्य घटं करोमि स्वर्गमुद्दिश्य यागं करोमीत्याद्यनुव्यवसायात् । इत्थञ्च तत्तत्साध्यतावच्छेदककतत्तत्साध्यकप्रवृत्तित्वावच्छिन्नं प्रति तत्तत्साध्यतावच्छेदकत–त्तत्साध्यविशेष्यककृतिसाध्यताज्ञानस्य हेतुत्वान्न व्यभिचारः । नैयायिकैरपि कृतिसाध्यताज्ञानचिकीर्षयोर्हेतुत्वोपगमादितिभावः । एवमेव विधिवादरहस्ये मथुरानाथः ।

भट्टास्त्वाहुर्लिङाद्यर्थोऽभिधा । सैव प्रवृत्तिहेतुः । तथाहि लिङादेस्तावदभिधानात्मकः स्वनिष्ठो

व्यापारोऽवश्यमभ्युपेयः, "व्यापारभिन्नस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा" यथा दण्डस्य स्वनिष्ठस्पन्दार्जनद्वारा चक्रनिष्ठस्पन्दजनकत्वम्। अत्र व्यापारे व्यभिचारवारणाय व्यापारभिन्नस्येति। व्यापारिणः स्वनिष्ठव्यापारजनने न व्यापारापेक्षाऽनवस्थापत्तेरित्यतः परनिष्ठेतिव्यापारविशेषणम्। ज्ञानद्वारैव लिङादि प्रवृत्तिं जनयत्विति शब्दाश्रिता सा नायास्यतीत्यत उक्तं स्वनिष्ठेति। सा चाभिधा शब्दाश्रितत्वाच्छाब्दी भावनेत्युच्यते। अपरा चार्थविषयत्वेनार्थी भावनेत्युच्यते। सा च सर्वाख्यातवाच्या। तदुक्तं "अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते॥" "अर्थात्मत्वम्" अर्थविषयत्वम्, अर्थभावना च कर्मकरणमितिकर्तव्यताञ्चापेक्षत इत्यंशत्रयवती भवति। अन्यथा फलं स्वर्गादि सा न भावयेत्, तस्यैतत्त्रितयाधीनत्वात्। एवञ्च शब्दभावनापि भावनात्वात् किं केन कथमित्यंशत्रयवती भवति। तदिदमाह—लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः। सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते॥ इति। किमित्याकाङ्क्षायां प्रवर्तनीयपुरुषप्रवृत्तिर्भाव्या सैव कर्म; केनेत्याकाङ्क्षायां सम्बन्धबोध इति, अव्युत्पन्नस्य लिङ्पदादप्यप्रवृत्तेः सम्बन्धबोधेन तच्छक्तिग्रहरूपेण सहकारिणा सा प्रवर्तयतीत्यर्थः। कथमित्याकाङ्क्षायां प्ररोचनेति। प्ररोचना स्तुत्यर्थवादः, स च कर्मणः प्रशस्तत्वज्ञानमन्तरेणावसीदन्तीं प्रवृत्तिमप्रापयन्तीं विधिशक्तिं प्राशस्त्यज्ञानद्वारा प्रवृत्तिजननीं करोति, अतएव यत्र प्ररोचना न श्रूयते तत्रापि कल्प्यत इति तस्या विध्यविनाभाव इति। इदमत्र तत्त्वम्—अभिधापि न तत्त्वेन ज्ञाता स्वरूपसती वा हेतुरतिप्रसङ्गादिति प्रवर्तनात्वेन भावनात्वेन च ज्ञाता तथा, तथाच यज्यादिपदसमभिव्याहारेण यागादिजनकप्रवृत्तिजनकत्वग्रहे समानसंवित्संवेद्यतया यागादावपि कृतिसाध्यत्वभानं, भाव्यानुपस्थितौ च भावनात्वेन ज्ञानमसम्भवीति समभिव्याहृतफलं प्रति भावनात्वेन ज्ञायते। अतएवाश्रुतफले विश्वजिदादौ फलं कल्प्यते। तथाचाभिधागतमिष्टसाधनत्वमपि भासते। तच्च क्रियागतमिष्टसाधनत्वं विना नेत्याक्षिप्ततदिष्टसाधनताबोधोऽपि, तथाच प्रवर्तनात्व-भावनात्वज्ञानानुकूलाऽप्यपरा शक्तिर्लिङादिपद एव, अतएवैका प्रवृत्त्यनुकूला अपरा ज्ञानानुकूला इति शक्तिचतुष्टयमिति। अन्ये तु व्यवहारेण व्युत्पित्सुर्बालः स्वप्रवृत्तिजनकत्वेनावधारिते शक्तिं कल्पयति तादृशीच्छैवेति, सैव लिङर्थ इत्याहुः। अपरे तु अपूर्वमेव विध्यर्थं वैदिके तज्ज्ञानस्यैव प्रवर्तकत्वादित्याहुः। इतरे तु प्रवृत्तिरूपभावनाज्ञानं प्रवर्तकमिति सैव विध्यर्थ इति वदन्ति। तदेतानि मतानि न समीचीनानि। अभिधायां मानाभावेन तत्र तस्यां सत्यामप्यप्रवृत्तेः। इदमत्राकूतं पदार्थसम्बन्धभिन्नायामभिधायां मानाभावः, व्यवहाराधीनव्युत्पत्तिबलेन शब्दस्य ज्ञानमात्रजनकत्वावधारणेन प्रवृत्तिजनकत्वाभावात्; भावे वा आवश्यकेष्टसाधनताज्ञानमात्र-

विधिबोधिनी

व्यापारकत्वेनैवोपपत्तावभिधालक्षणव्यापारकत्वे मानाभावात्। एवमिच्छापि न लिङर्थस्तस्याः स्वरूपसत्या एव प्रवर्तकत्वेन ज्ञानफलकशक्तेरकल्पनात्। स्वर्गकामादिपदलभ्यत्वाच्च। अपूर्वज्ञानमपि न प्रवर्तकम्, अपूर्वपदादिना तद्भानेऽप्रवृत्तेः, तदज्ञानेऽपीष्टसाधनत्वज्ञाने प्रवृत्तेश्च। भावनाज्ञानमपि सर्वाख्यातसाधारण्यान्न प्रवर्तकमिति। फलज्ञानं तु न प्रवर्तकमिति प्रत्यक्षप्रकाशेऽधिकं द्रष्टव्यम्।

प्रभाकरमते यद्विषयिनी बुद्धिः प्रवृत्तिजननीमिच्छां प्रसूते स एव विधिप्रत्ययप्रतिपाद्यः। एतन्मतेऽपीष्टसाधनत्वमपि विध्यर्थो भवत्येव। अतएव तैर्नित्यापूर्वं निषेधापूर्वं पण्डापूर्वमपि सन्ध्यामुपासीत न कलञ्जं भक्षयेदित्यादिविधिनिषेधयोः कल्प्यते। कल्प्यते च यागस्याशुविनाशित्वेन स्वर्गोत्पत्तिकाले तस्याभावात् तदुत्पत्त्यर्थं यागजन्यमपूर्वम्। अतएव कार्यत्वविशिष्टापूर्वस्य विध्यर्थत्वाद्विशेषणांशः कार्यत्वमपि तदर्थः। एवञ्च वेदे कार्यत्वविशिष्टापूर्वसम्भवेन तत्र शक्तिरेव। लोके तु पचेतेत्यादावपूर्वे तात्पर्यासम्भवात् कार्य्यत्वे लक्षणेवेति गुरुमतसंक्षेपः।

तन्मतमिति विचारासहमिति। तन्मतं क्रियाकार्यत्वस्य विध्यर्थतावादिमीमांसकमतमित्यर्थः। विचारासहं सकलविधीनामसंग्रहापत्तेः; प्रागुक्तदूषणग्रस्तत्वाच्च।

गादाधरी

अतो मीमांसकमतेऽपि कृतिसाध्यत्वमिष्टसाध्यत्वं पृथग् विध्यर्थ एव। परन्तु न्यायमतवन्मिलितं तदुभयं न विध्यर्थः। अतोऽहरहः सन्ध्यामुपासीतेत्यादौ तन्मतेऽयोग्यतया इष्टसाधनतानन्वयेन केवलकृतिसाध्यताबोधनिर्वाहः। अतएव विलम्बभाविफलसाधनक्रियाविधायकवाक्येन व्यापारगतस्वर्गादिफलसाधनताबोधनमपि तेषामुपपद्यत इति युक्तमुत पश्यामः।

न चैवमुक्तलक्षणेनाहरहरित्यादिनित्यविधीनां न तन्मते संग्रह एवेति वाच्यम्। इष्टसाधनत्व-द्विष्टसाधनत्वाभाववत्त्वयोरिच्छाविषयताप्रयोजकधर्मत्वेनानुगमय्य लक्षणे निवेशनीयतया नित्यविधिसंग्रहसम्भवात्।

गादाधरी

नित्यविधिस्थले लिङ्पदस्य द्विष्टसाधनत्वाभाववत्त्वबाचकतामभ्युपेत्यैव तस्य प्रवर्तकत्वनिर्वाहात्। न्यायमते च नित्यविधिस्थलेऽपि सर्वत्रेष्टसाधनत्वमेव विध्यर्थः। सन्ध्योपासनादेरपि ब्रह्मलोकगमनादिसाधनताया अर्थवादेन बोधनात्

विधिबोधिनी

तन्मत इति पूर्वोक्तमीमांसकमते। सन्ध्यावन्दनादिनित्यविधाविष्टसाधनत्वाभावान्न संग्रह इति पूर्वेणान्वयः। द्विष्टसाधनताभाववत्त्वेति। द्विष्टत्वं च दुःखसाधनताज्ञानजन्याप्रीतिजन्यचित्तवृत्तिविशेषविषयत्वम्। द्विष्टसाधनताज्ञानञ्च बलवद्द्वेषविषयतावच्छेदकधर्मावच्छिन्ननिरूपितसाधनत्वप्रकारकज्ञानम्। बलवत्त्वं च वैजात्यमेव। तच्च नान्तरीयकदुःखविषयकद्वेषव्यावृत्तं स्वसाधनकर्मसाध्येष्टनियतपूर्ववर्ति यद्यत् स्वं तत्तद्भेदकूटविशिष्टदुःखविषयकद्वेषत्वम्। तत्रैव तादृशवैजात्याङ्गीकारात्। अनुगमय्येति। तादृशेच्छाविषयताप्रयोजकधर्मत्वस्योभयत्र सत्तान्न मीमांसकमतेऽपि नित्यविध्यसंग्रहः। न्यायमते चेति। नैयायिकास्तु नित्यकर्मस्थलेऽपि "सन्ध्यामुपासते ये तु सततं शंसितव्रताः। विधूतपापांस्ते यान्ति ब्रह्मलोकं सनातनम्॥ निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रैकाल्यसन्धाकरणात् तत् सर्वं विप्रणश्यति॥" (याज्ञ. अः७ श्लोः ३०८)। "यदह्ना कुरुते पापं कर्मणा मनसा गिरा। आसीनः पश्चिमां सन्ध्यां प्राणायामैर्निहन्ति तत्॥" (मिताक्षरायां यमः) "अनृतं मद्यगन्धं च दिवा मैथुनमेव च। पुनाति वृषलान्नं च सन्ध्या बहिरुपासिता॥' (मिताक्षरायां शातातपः, अः ३ श्लोः ३०८) इत्याद्यर्थवादाद्युपस्थापितब्रह्मलोकावाप्तेर्नरकात्यन्ताभावस्यैव वा प्रायश्चित्तवत् सन्ध्यावन्दनादिनित्यविधेरपि फलजनकत्वसम्भवादिष्टसाधनत्वमेव सर्वत्र लिङर्थ इति प्राहुः।

प्रत्यवायानुत्पादरूपफलसाधनतेति। 'क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते॥ नित्यक्रियां तथैवान्ये ह्यनुषङ्गफलां श्रुति" मिति वचनप्रामाण्यान्मुमुक्षवोऽपि प्रत्यवायानुत्पादरूपफलसाधनत्वरूपेष्टसाधनताज्ञानात् तत्र प्रवर्तन्ते। फलं चेष्टमेव। इष्टत्वं चेच्छाविषयत्वम्। क्षेमत्वञ्च विद्यमानस्य वस्तुनः स्वाधिकरणे स्वविशिष्टबुद्धिनियामकसम्बन्धविशेषव्यवस्थापनम्। यथा कृतिसाध्यत्वस्य विध्यर्थतामते "एकादश्यामुपवसे" दित्यादावहोरात्रभोजनाभावस्य क्षेमनिर्वाह्यं कृतिसाधनत्वम्। प्राप्तस्य परिरक्षणमित्यर्थः।

यदि च विश्वजिता यजेतेत्यादि। यत्र विधिवाक्ये फलं न श्रूयते तत्र केवलं धात्वर्थोपस्थापितयाग एव साध्यत्वेन विधीयते इति कर्ममात्रं कर्तव्यत्वेन प्रतीयते ; फलस्य शब्देनानुपस्थितत्वात्। "न ह्यशब्दं प्रतीयते" इत्यादिना पूर्वपक्षीकृत्य जैमिनीयसिद्धान्तसूत्रम् (४।३।१५) स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वादिति। तथाच यत्र चोदनायां फलं न श्रूयते तत्र सर्वान् पुरुषान् प्रत्यविशेषेणैकमात्रं प्रीत्यपरपर्यायस्वर्गरूपफलं कल्प्यते। स्वर्गश्च "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्"॥ तथाऽत्रापि सन्ध्यादि नित्यविधौ फलकामपदाभावाद् विश्वजिन्न्यायेन स्वर्ग एव फलं कल्प्यताम्। तथा सत्यर्थवादोपस्थापितफलकस्य सन्ध्यावन्दनादेरपि काम्यत्वं प्रसज्येत। काम्यत्वे च फलकामनाशून्यानां मुमुक्षूणां सन्ध्यावन्दनादिनित्यकर्मसु प्रवृत्तिर्न स्यादनधिकारापत्तेः कष्टं कर्मेति नयेन तत्परित्यागापत्तेश्च। एवं चैकमात्रफलकामस्याप्यनधिकारितया प्रत्यावायोऽपि न स्यात्। प्रत्यवायत्वञ्च विहितकर्मणां विपरीताचरणत्वमिति मनुटीकायां कुल्लुकभट्टाः। इत्थमत्र चिन्तनीयम्। अर्थवादवाक्ये फलद्वयं श्रूयते। एकं ब्रह्मलोकावाप्त्यादीष्टविशेषरूपं भावफलकम्। अपरं च नरकाभावरूपफलकामस्वरूपमभावफलकम्। तात्पर्यवशाद् विधिप्रत्ययस्य भावफलकान्वये कामनाशून्यानां मुमुक्षूणामनधिकारापत्तिः ; तथाऽभावफलकान्वये च पापाभावनिश्चयवतां पुण्यशीलानाञ्च मुमुक्षूणामनधिकारापत्तिः। एवं च यथा मुमुक्षूणां सन्ध्याद्यकरणे प्रत्यवायो न स्यात् तथा एकैकमात्रफलकामस्याप्यधिकाराभावेन प्रत्यवायो न स्यादिति चाकरणे प्रत्यवायरूपं नित्यत्वं सन्ध्यादीनां व्याहन्येतेति समुदिततात्पर्यम्। वाक्यभेदापत्तिरिति। यदि च फलद्वयकामनायाः पृथक् पृथगधिकारिद्वयं कल्प्यते ब्रह्मलोकावाप्तिकामः सन्ध्यामुपासीत, नरकनिवृत्तिकामः सन्ध्यामुपासीतेत्येवं वाक्यार्थभेदात् वाक्यभेदापत्तिरित्यर्थः। "सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते" इत्युक्तेर्वाक्यभेदो दोष एव। उक्तञ्च जैमिनिसूत्रे "विधौ च वाक्यभेदः स्यात्" (१।२।२५) वाक्यभेदो नाम दोषः स्यादित्यर्थः।

'सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति नयेन आवृत्त्याऽनेकोच्चारणेन श्रूयमाणस्य वेदवाक्यस्यानेकार्थे ग्रहणं वाक्यभेदः। पौरुषेयवाक्ये वक्तुरभिप्रायरूपतात्पर्यबलादस्तु नाम वाक्यभेदः श्लेषालङ्कारादौ ; वेदवाक्ये वक्तुरभावात् तथा मीमांसकमते तत्प्रतीतिबोधनयोग्यत्वस्य तात्पर्यरूपत्वाद् वेदवाक्यादर्थद्वयकल्पने चैकस्य पौरुषेयत्वं प्रसज्येत। यत्रैकवाक्यता न सम्भवति तत्रागतिकैर्वाक्यभेदस्वीकाररूपगौरवमाश्रीयत एवं वाक्यभेदपरिहारार्थं शङ्कते यदि चेत्यादि, वाक्यभेदस्यावकाश इत्यन्तेन ग्रन्थेन। शौचादिरूपेति। "शुचितत्कालजीवी कर्म कुर्यादित्यादिविधौ शुचित्व - तत्कालजीवित्वयोर्यथा परस्परधर्मितावच्छेदकतापन्न-

धर्मावच्छिन्ने परस्परानाश्रयधर्मिसाधारण्येनान्वयस्तथा नरकनिवृत्ति-ब्रह्मलोकावाप्तिकामयोः सति तात्पर्ये तथाविधे चान्वयेन वाक्यभेद इति समुदितार्थः। विशेषणद्वयनिरूपितविशेष्यतयोरित्यादि। तथाच नीलघटवद् भूतलमित्यादिज्ञानस्थले भूतलांशे प्रकारीभूते घटादौ यथा प्रकारताख्या विषयता वर्तते तथैव तस्य घटादेर्नीलगुणविशेष्यतापन्नत्वात् तत्र घटादौ विशेष्यताख्या विषयतापि वर्तते। तत्र तयोरेकनिष्ठप्रकारता विशेष्यताख्यविषयतयोरभेदं जगदीशप्रमुखा नैयायिका लाघवात् स्वीकुर्वन्ति। तन्मते नीलघटवद् भूतलमितिज्ञानस्य स्वरूपम्। नीलत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्ना या नीलगुणघटत्वधर्मद्वयावच्छिन्ना प्रकारता तन्निरूपितभूतलत्वावच्छिन्नविशेष्यताशालिज्ञानमिति। तत्र घटगतप्रकारताविशेष्यतयोरैक्येन कार्यकारणभावप्रतिबध्यप्रतिबन्धकभावादिकल्पनावसरे नीलत्वावच्छिन्नप्रकारता-निरूपितघटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालिज्ञानत्वरूपेण शक्यते तस्योपादानं कर्त्तुमिति घटगतविशेष्यतायाः परिहारेण लाघवं भवति। अन्तरा भासमान-पदार्थानां यावद् यावदाधिक्यं तावत्तावदेव लाघवस्यापि ज्ञेयमाधिक्यम्। एवमन्यत्रापि समानाधिकरणविषयतयोरभेदः प्रतिपत्तव्यः। गदाधरभट्टाचार्यास्तु तत्त्वचिन्तामणेरनुमिति-प्रकरणदीधितिविवृतौ तन्मतं समुल्लिख्य तत्र महान्तमेव दोषमुपन्यस्य तत्रान्यथैव सिद्धान्तमुपकल्पयामासुः। तदुक्तं तैः "केचित्तु एकविशेष्यतापन्नस्य यत्रापरांशे प्रकारता तत्र तन्निरूपितप्रकारताविशेष्यतयोरभेद एव······तच्चिन्त्यम्।" तथा सति रक्तदण्डवत् पुरुष-वानयमित्यादिज्ञानानां पुरुषादिप्रकारतानिरूपितदण्डादिविशेष्यताकत्वेन पुरुषाभाववान् दण्ड इत्यादि निश्चयप्रतिबध्यत्वप्रसङ्गादिति। तत्रान्तरा भासमानपदार्थगतविषयताद्वयस्यावच्छेद्या-वच्छेदकभावं (भेदरूपं) भट्टाचार्या अभ्युपगच्छन्ति। तन्मते प्रकृतस्थले दण्डप्रकारताया दण्डगतविशेष्यतानात्मकत्वे पुरुषगतविशेष्यतायाश्च पुरुषप्रकारतानात्मकत्वेन न निरुक्तप्रसङ्ग इत्यस्मद्गुरवस्तर्काचार्यपादाः। अतएव मतभेदेन भेदस्यावच्छेद्यावच्छेदकभावस्य वेत्युक्तिः सुतरां सङ्गच्छते। एवं विवक्षायां वाक्यभेदाभावेन सामञ्जस्यादाह अतएवेति। सर्वेभ्यो दर्शपौर्णमासाविति। प्रदर्शितं च योगसिद्ध्यधिकरणे "योगसिद्धिर्वार्थस्योत्पत्त्यसंयोगित्वात्" (जैः ४।३।२८) इति जैमिनिसूत्रव्याख्यानावसरे कामनानां निरपेक्षतया सकृदनुष्ठाने नैकैव कामना सिध्यति। सकृदनुष्ठानात् सर्वकामनासिद्धिरित्यभ्युपगम्यमाने वाक्यभेदः; अतः कामनानां साहित्यं न स्वीक्रियते। योगेन पर्यायेण पृथक् पृथगनुष्ठानेन पृथक् पृथक् फलनिष्पत्तिः। यदि कुत्रचिदेकप्रयोगेन सर्वार्थसिद्धिरार्षवचनप्रामाण्यादुपदिष्टं स्यात्तदा किमिव वचनं न कुर्या"न्नास्ति वचनस्यातिभार" इति न्यायात् सर्वार्थसिद्धिर्भवत्येव सर्वशब्दस्य व्यापकार्थत्वादिति भावः।

विधिबोधिनी

धवखदिराविति। अत्र धवत्वं खदिरत्वं च प्रत्येकं नोद्देश्यतावच्छेदकम्। आकाशावित्यादि-वाक्यस्य प्रामाण्यवारणाय धवद्वयस्य खदिरद्वयस्य च बोधवारणाय सुपामुद्देश्यतावच्छेदकव्याप्य-संख्याबोधकत्वस्य क्लृप्तत्वात्। तथाच धवखदिरावित्यत्र धवखदिरोभयवृत्तिद्वित्वस्य धवश्च खदिरश्चेति विभक्त्यर्थद्वित्वप्रकारेण बोधः। तथाच न वाक्यभेदो न वा द्वन्द्वसमासानुपपत्तिरिति भावः। तथेति। वाक्यभेद इत्यर्थः। तथा सतीति वाक्यभेदे सतीत्यर्थः। समासानुपपत्तेरिति। चार्थे द्वन्द्व इत्यनुशासनात् समुच्चयान्वाचयेतरेतरसमाहाररू-पेषु चार्थचतुष्टयेषु सामर्थ्याभावेनाद्ययोश्चार्थयोः समासासम्भवादन्त्ययोरेव समासः। तत्र चार्थस्य भेदव्याप्यत्वेन भेदे द्वन्द्व इत्याशयः। भेदश्च पदजन्यप्रतीतिविषयत्वरूपपदार्थस्य पदार्थतावच्छेकस्य वेत्यन्यदेतत्। वाक्यभेदे सामार्थ्याभावादेव न समास इति भावः। निन्दार्थ-वादस्येति। अहरहः सन्ध्यामुपासीतेति विधिवाक्यस्य प्राशस्त्यज्ञापनाय यथा "सन्ध्यामुपासते येत्वित्यादि स्तुत्यर्थवादः प्रयुक्तस्तथा "सन्ध्या येन न विज्ञाता सन्ध्या नैवाप्युपासिता। जीवन्नेव भवेच्छूद्रो मृतः श्वा चाभिजायते॥" (अग्निपुः) "सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते किञ्चिन्न तस्य फलभाग् भवेत्॥" (दक्षसंहिता) इत्यादिनिन्दार्थवादस्य विधि-वाक्यैकवाक्यतापन्नस्य साधारणशौचादिमतोऽकरणे प्रत्यवायजनकत्वमित्यर्थे तात्पर्य्यात् कामना-शून्यशौचादिमतामवश्यकर्त्तव्यत्वं सन्ध्यावन्दनादेः प्रतीयते। शुचित्वं च वैदिककर्मयोग्यत्व-सम्पादकसंस्कारविशेषत्वम्। समर्थस्येति। सामर्थ्यंच यत् किञ्चित्कार्यजननयोग्यत्वम्। आस्तिकस्येति। "अस्ति वेदे मतिर्यस्य स आस्तिक उदाहृतः"। अस्ति परलोक इति वा जन्मान्तरविश्वासीत्यर्थः। प्रत्यवाये द्वेषेणेति। द्वेषश्च प्रज्वलनात्मकः (प्रशस्तपाः)। न्यायनये दुःखविषये तत्साधनविषये च द्वेषो भवति। द्वेषे सतीष्टसाधनताज्ञानानुत्पादेन तत्र प्रवृत्तिर्न स्यादिति भावः। नान्तरीयकश्रमादाविति। श्रमश्च नान्तरीयक - दुःखविशेष इति मथुरानाथः। नान्तरीयकत्वं तत्सत्तानियतसत्ताकत्वम्।

गादाधरी

मुमुक्षवोऽपि प्रत्यवायानुत्पादरूपफलसाधनताबोधात्तत्र प्रवर्तन्ते।
अतस्तादृशफलसाधनत्वमपि तत्तद् विध्यर्थः। तत्साधनत्वञ्च क्षेमसाधारणम्।
अथ स्वर्गकामो यजेतेत्यादितः स्वर्गादिसाधनत्वमेव प्रतीयते न तु तात्पर्य्य-भ्रमादपि इष्टान्तरसाधनत्वमिति समभिव्याहृतपदोपस्थापितकामनाविषय-

तावच्छेदकावच्छिन्नसाधनत्वे विधिप्रत्ययशक्तिः स्वीकार्य्या। तथाच सन्ध्यावन्दनादिविधौ फलकामवाचकपदाभावात् कथं फलसाधनताबोधः। यदि च विश्वजिता यजेतेत्यत्रैव फलकामवाचकपदं तत्राध्याह्रियते। अर्थवादोऽपि विध्युत्थापितो विधिप्रत्ययस्य स्वोपस्थापितब्रह्मलोकावाप्त्यादिरूपेष्टविशेषतात्पर्य्यग्राहक इति तात्पर्य्यविषयफलबोधोपपादकतत्कामवाचकपदाध्याहारे उपयुज्यते। अतो विधेरिष्टसाधनताबोधकत्वमित्युच्यते तदा ब्रह्मलोकावाप्त्यादिरूपभावफलकामबोधकपदमात्रसमभिव्याहारकल्पने मुमुक्षावशेन तत्फलकामनाशून्यस्यानधिकारापत्तिः। नरकाभावरूपफलकामबोधकपदमात्रसमभिव्याहारकल्पने च भावफलकल्पनाया अधिकारत्वानुपपत्तिः। उभयफलकामबोधकपदसमभिव्याहारकल्पने च सम्बलिताधिकारापत्त्या एकैकमात्रफलकामस्याधिकारो न स्यादिति तस्याकरणं प्रत्यवायं नानुबध्नीयात्। यदि च फलद्वयकामनायाः पृथक् पृथग् धर्मिविशेषणतया बोधकमधिकारिपदं कल्प्यते तदा वाक्यभेदापत्तिर्वाक्यार्थभेदात्। यदि च नरकनिवृत्तिब्रह्मलोकावाप्तिकाम इत्यादिपदमेव कल्प्यते, अत्र चैकफलविशेष्यतापन्नकामनायामपरस्य, एककामनाविशेष्यतापन्नधर्मिण्यपरफलकामनाया वाऽन्वये न तात्पर्यमुपयते येनोभयकाम एवाधिकारी स्यात्। अपि तु एकफलधर्मितावच्छेदकतापन्नकामनात्वावच्छिन्ने तत्फलाविषयककामनासाधारण्येन फलान्तरान्वये कामनाद्वयस्य शौचादिरूपपरस्परधर्मितावच्छेदकतापन्नधर्मावच्छिन्ने परस्परानाश्रयधर्मिसाधारण्येनान्वये तात्पर्य्यम्। एवं सति वाक्यभेदस्यानवकाशः, विशेषणद्वयनिरूपितविशेष्यतयोरभेदस्यावच्छेद्यावच्छेदकभावस्य वा विशेष्यभेदेनासम्भवेऽपि तदुभयनिरूपितधर्मितावच्छेदकतारूपविषयतयोरभेदस्यावच्छेद्यावच्छेदकभावस्य वा सत्त्वात्।

अतएव सर्वेभ्यो दर्शपौर्णमासावित्यत्र प्रकृतिवाचिसर्वशब्दोपस्थाप्यपुत्रपश्वादि-फलानां तत्कामनानाञ्च दर्शितरीत्या पृथक् पृथगेव कामनाधिकारिरूप-विशेष्ययोरन्वयेऽपि न वाक्यभेदः, न वा धवखदिरौ छिनत्तीत्यादौ भिन्नभिन्न-कर्मत्वस्य छिदादिविशेषणत्वेऽपि तथा, तथा सति समासानुपपत्तेः।

न चैवमपि कामनाया अधिकारिविशेषणत्वे कामनाशून्यशौचादिमतां सन्ध्यो-पासनाद्यकरणे प्रत्यवायो न स्यादिति वाच्यम्। निन्दार्थवादस्य कामना-रूपाधिकाररहितसाधारणशौचादिमत एवाकरणे प्रत्यवाय इत्यत्र तात्पर्य्यात्। अतएव समर्थस्यास्तिकस्य तदनुष्ठानन्तंयत्य, तादृशस्य प्रत्यवाये द्वेषण तत्परिजिहीर्षावश्यकत्वात्; यस्य प्रत्यवाये न बलवान् द्वेषः, अपितु नान्त-रीयकश्रमादावेव, तेनानुष्ठीयत एव तत्तत्कर्मेत्युच्यते तदापि सकृदनुष्ठिताद् दर्शपौर्णमासादितः पुत्रपश्वादिरूपनानाफलानामिव तादृशात् सन्ध्या-वन्दनादिनित्यकर्मणोऽपि नरकनिवृत्तिब्रह्मलोकावाप्त्यादिरुपफलद्वयस्या-सिद्धिप्रसङ्गः।

उत्पत्तिवाक्ये फलस्य समुच्चयबोधकासत्त्वे वैकल्पिकमेव फलमिति योग-सिद्धयधिकरणसिद्धान्तात्। न च तादृशस्थले भावरूपफलानामेव समुच्चयः; न तु भावाभावरूपफलयोरपीति वाच्यम। बीजसाम्येनाविशेषात्। उत्पत्तौ फलानां यत्रैककामनायां युगपदन्वयरूपो योगो नास्ति तत्र मिलितफलकामनाया अनधिकारतया प्रत्येकफलकाम एवाधिकारीति नानाफलकामनया एकमनुष्ठानं न शास्त्रार्थ इत्येव ह्युक्तसिद्धान्तबीजं तद्भावाभावरूपफल-साधारणमपि। न च तत्तत्फलकामनात्वेन कामनाया अधिकारतया समूहालम्बनकामनावतो विभिन्नकामनाद्वयवतो वाऽधिकारोऽव्याहत एव समूहालम्बनादिरूपकामनायाः प्रत्येकं तत्तत्फलविषयत्वाक्षतेरित्यसौ सिद्धान्तो निर्युक्तिक एवेति वाच्यम्।

गादाधरी

शब्दानामवधारणपरतया औत्सर्गिकतयाऽसमुच्चिततत्तत्फलकामबोधक-पदानां तत्तत्फलमात्रकामपरतया समूहालम्बनादिरूपकामनावतोऽनधिकारस्य युक्तत्वात्।

अत्रोच्यते। नित्यकाम्यस्थलेऽनिष्टनिवृत्तिसम्बलिततत्तत्फलकाम एवाधिकारी। अतो जयन्तीव्रतादितः सकृदनुष्ठितादपि प्रत्यवायपरीहारस्तत्फलञ्च सिध्यति। एवं सन्ध्यावन्दनादितोऽपि।

न चैवं प्रत्यवायपरिजिहीर्षामात्रेण मुमुक्षूणां तत्तत्कर्मानुष्ठानानुपपत्तिरनधिकारित्वादिति वाच्यम्। समुच्चितफलकामनाधिकारिककर्मण एकैकफलकामनासहकारेणापि तत्तत्कामनाविषयफलजनकत्वोपगमात्।

विधिबोधिनी

तदभावे तदभावरूपा व्याप्तिर्वा, आवश्यककर्मान्तर्नियतभावित्वमिति यावत्। उत्पत्तिवाक्ये कर्मोत्पत्तिवाक्य इत्यर्थः। समुच्चयश्चात्र निरपेक्षाणामेकत्रान्वयरूपो ग्राह्यः। एवञ्चाहरहः सन्ध्यामुपासीतेति विधिवाक्ये फलाश्रवणादर्थवादावगतयो ब्रह्मलोकावाप्तिनरकनिवृत्तिरूपयोः कल्पितयोर्भावाभावफलयोर्द्वयोः पृथक् पृथगन्वये वाक्यभेदः, पूर्वोपदर्शितरीत्या पृथक् पृथक् कामनाधिकारिरूपविशेष्ययोरन्वये चोत्पत्ति वाक्ये समुच्चयबोधकपदाभावादेव योगसिद्ध्यधिकरणन्यायेन वैकल्पिकमेव फलमिति सिद्धान्तः। वीजसाम्येनेति हेतुसाम्येनेति। फलोत्पादनसाम्येनेत्यर्थः। उत्पत्ताविति। उत्पत्तिविधावित्यर्थः। योगसिध्द्यधिकरणन्यायेन प्रागुक्तवैकल्पिकफलमिति सिद्धान्तं खण्डयितुमाशङ्कते न चेति। समूहालम्बनरूपकामनायां प्रत्येकफलस्यान्वये समूहालम्बनकामनावतोऽधिकारात् समुच्चितफलसिद्धेरेव युक्तत्वादित्यसौ सिद्धान्तो न युक्तिसह इति पूर्वपक्षिणामाशयः। समूहालम्बनं च नानाप्रकारतानिरूपितं नानामुख्यविशेष्यताशालिज्ञानमिति व्युत्पत्तिवादे गदाधरः। शब्दानामवधारणपरतयेति। उत्कटनिश्चयपरतयेत्यर्थः। औत्कट्यञ्च विषयताविशेषः। निश्चयत्वं तदभावाप्रकारकं तत्प्रकारकं ज्ञानम्। अवधारणत्वञ्च निश्चयनिष्ठो विषयताविशेषः। औत्सर्गिकतयेति बलवद्बाधकविरहतयेत्यर्थः। असमुच्चितस्थले तत्तत्फलकाम एवाधिकारी। तत्र समूहालम्बनादिरूपकामनावतोऽनधिकारस्य युक्तत्वादिति वक्ष्यते।

पिण्डितार्थस्य सिद्धान्तं प्रदर्शयति 'अत्रोच्यत' इति। नित्यकाम्यत्वंच नित्यत्वे सति काम्यत्वम्। नित्यत्वञ्च यदकरणे प्रत्यवायस्तत्त्वमिति न्यायमञ्जरी। प्रत्यवायसाधनीभूताभावप्रतियोगित्वमित्यर्थः नियतनिमित्तकत्वमिति यावत्। "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्। उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्। फलाश्रुते र्वीप्सया च तन्नित्यं परिकीर्तितमिति" मनूक्तेः। काम्यत्वंच फलकामनाधीनकर्तव्यताकत्वम्। आरब्धकार्य्योत्पत्तिकामनाधीनकामनाविषयत्वमिति मथुरानाथः। तथाच संयोगपृथक्त्वन्यायान्न नित्यानित्यसंयोगविरोध इति भावः। एवञ्च सकृदनुष्ठितेन सन्ध्यावन्दनादिना प्रत्यवायपरिहारफलकं नित्यत्वं, ब्रह्मलोकावाप्तिफलकं काम्यत्वञ्च सिध्यति। अतएव "संकल्पादिकं विनापि सन्ध्यादिवन्नित्यकर्मणा कृतेनैव पापक्षय उक्त" इतिस्मार्तभट्टाचार्य्योक्तिः सुतरां सङ्गच्छते। न चैवं मुमुक्षूनामपि नित्यकर्मकारणात् काम्यफलसिद्धिरिति वाच्यं "सम्यक् संसाधनं कर्म कर्तव्यमधिकारिणा। निष्कामेण सदा पार्थ! काम्यं कामान्वितेन चे" ति भविष्यपुराणेन स्वर्गादिकाम्ये कामनावत एवाधिकारात्। अतएव काम्यो नैमित्तिको वाऽर्थो नित्यमर्थं विकृत्याभिनिविशते न नित्य इत्युक्तं द्वादशाध्याये जैमिनीयदर्शने। सम्यक् संसाधनं प्रथमकल्पनादिना करणं यस्य तत् तथा। अधिकारिणा अर्थिना विदुषा समर्थेन। काम्ये सर्वशक्तिमतोऽधिकारदर्शनात्। निष्कामेनेति नित्यपरं मुमुक्षुपरञ्च। अतएव मार्कण्डेयपुराणेऽपि फलार्थिनं प्रति फलदातृत्वं तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वं पितृणामाहरुचिः "पितृन्नमस्ये दिवि ये च मूर्ताः स्वधाभुजः काम्यफलाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेषु॥" एवं देवतानामपि फलदातृत्वमधिकारिभेदेनेति स्मार्तसिद्धान्तात्। कामनावतां च नित्यकाम्यस्थले काम्यानुष्ठाने नित्यत्वसिद्धिः। अतो जयन्तीव्रतादित इति। जयन्तीव्रतं च "सिंहार्के रोहिणीयुक्ता नराः कृष्णाष्टमी यदि। रात्र्यर्द्धपूर्वापरगा जयन्ती कलयापि च॥ श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप। रोहिणी यदि लभ्येत जयन्ती नाम सा तिथिः" इत्यादिस्मार्तवचनजातेनानुष्ठीयमानं नित्यकाम्यव्रतम्। तद्व्रतस्यानाचरणे दोषश्रुतेर्नित्यत्वात् समाचरणे च विष्णुलोकप्राप्त्यादिफलश्रुतेः काम्यत्वाच्च। तस्य च सकृदनुष्ठानेन सर्वशक्तिमतां काम्यफलसिद्धिरिति प्रत्यवायपरिहारार्थं न पृथगनुष्ठानं न वा सकृन्नित्यानुष्ठाने कृते काम्यफलसिद्ध्यर्थं पृथगनुष्ठानमिति निष्कर्षः। एवञ्च समुच्चितफलकामनाधिकारिककर्मणां तत्तत् कामनाविषयफलजनकत्वसिद्धेर्नपि विरकाधः। कर्मज्ञापकविधेः प्राबल्यादित्यर्थः। वस्तुतस्तु नैयायिकमते नित्ये काम्ये च कामनाया एवाधिकारत्वेन कामनावानेवाधिकारी। कामना चेष्टसाधनताज्ञाननिर्वर्त्त्या। इष्टसाधनताज्ञानादित्रिकस्यैव सर्वत्र प्रवर्तकत्वात्। न च शुचित्वादेरधिकारत्वम "अशुचिर्वा शुचिर्वापि काले सन्ध्यां समाचरेदिति" वचनविरोधापत्तेः।

गादाधरी

अन्यथा काश्यादिमृतस्य नरकाद्यभावनिश्चयेन तन्नरकोद्धारादिकामना-रहिततत्पत्न्यास्तत्सहमरणस्य सकलशिष्टसम्मतस्यानुपपत्तेः।

विधिबोधिनी

न चैवं शुचिः कर्म कुर्वीतेत्यादिश्रुतिविरोधापत्तिरिति वाच्यं। तस्याः शुचित्वे काम्यसाधारण-कर्मत्वावच्छिन्नप्रयोजकत्वपरत्वात्। नित्यस्य सन्ध्योपासनादेः कदाचिच्छुचित्वविरहेऽप्युक्त-श्रुतिविरोधाभावात्। एवमुक्तवचनेन सन्ध्यादेर्विध्युक्तकालावच्छेदेनावश्यकर्त्तव्यप्रतिपादनेन शौचाभावप्रयुक्तसन्ध्याद्यकरणस्यापि प्रत्यवायसम्पादकत्वादिति ध्येयम्। अतएव व्यतीते सन्ध्याकाले तत्प्रत्यवायपरिहारार्थं दशधा गायत्रीजपरूपं प्रायश्चित्तं कुर्वन्ति शिष्टाः। अन्यथेति। एवञ्च प्रत्यवायपरिजिहीर्षामात्रेण मुमुक्षुभिरपि तत्तन्नित्यं कर्मावश्यमेव कर्त्तव्य-मित्यायातम्। तदनङ्गीकारे इत्यन्यथाशब्दार्थः। काश्यादिमृतस्येति। "काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिरिति महाभारतटीकाकृन्नीलकण्ठधृतस्मृतेः "तत्र हि जन्तोः प्राणेषूत्क्रममानेषु रुद्रस्तारकं ब्रह्म व्याचष्टे, येनासावमृतीभूय मोक्षीभवतीतिश्रुतेश्च काशीमृतस्य मुक्तिनिश्चयात् सुतरां नरकाद्यभावस्यैवोपपत्तेर्नरकोद्धारणकामनया कथं तत्पत्न्याः सहमरण-मित्युपपादयिष्यते समुच्चितफलकामकर्तव्यत्वबोधकमित्यादिनोपरिष्टात्। व्यालग्राहीत्यादि। "मृते भर्तरि या नारी समारोहेद्धुताशनम्। सारुन्धती समाचारा स्वर्गलोके महीयते॥ तिस्रः कोट्यर्धकोटी च यानि लोमानि मानवे। तावन्त्यब्दानि सा स्वर्गे भर्तारं यानुगच्छति॥ व्याल-ग्राही यथा व्यालं बलादुद्धरते विलात्। तद्वद्भर्तारमादाय तेनैव सह मोदते" ॥ इत्याद्यङ्गिरो-वचनात् पत्युर्नरकोद्धारादिफलसहितस्वर्गभोगस्य सहमरणफलश्रवणात् काशीमृतस्य नरकाद्य-भावनिश्चयेन तदनुपपत्तेः। अतएव तदुभयकामनयापि शिष्टानां तथाचरणं भूयो भूयोऽभिदृश्यते। तत्र समुच्चितफलकामकर्तव्यत्वबोधकविधेरुपपादनं विना नैव सम्भवतीति तदेवोपपादयति "समुच्चितफलकामकर्तव्यत्वबोधकमपीति"। तथाचात्र स्मार्त्तभट्टाचार्य्याः "न च योगसिद्ध्य-धिकरणविरोधान्न समुच्चितफलसिद्धिरिति वाच्यम्। योगसिद्ध्यधिकरणे हि यः पुत्रकामो यः पशुकाम इत्यादिना यज्ञक्रतूनुपक्रम्य एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो दर्शपौर्णमासावित्युक्तं तत्र तत्तद्विधिवाक्येषु निरपेक्षफलश्रुतेः कामनाभेदान्न कुत्रैक्यम्। ततश्च सर्वशब्देन प्रकृतिवाचिना निरपेक्षाणामेव पुत्रादिफलानां दर्शपौर्णमाससम्बन्धेऽवगते प्रयोगभेदाद्भवतु तत्र तत्तत्फलसिद्धिः। तथाच तदधिकरणसिद्धान्तसूत्रम् "योगसिद्धिर्वाऽर्थस्योत्पत्त्य-योगित्वादिति" (जैः ४।३।२८)। अस्यार्थः वा-शब्दः सिद्धान्तद्योतनार्थः। सर्वेभ्यो दर्शपौर्णमा-सावित्यत्रार्थस्य तत्तत्फलस्य योगेन प्रयोगभेदेन सिद्धिरुत्पत्त्ययोगित्वात्, सर्वशब्दानुकर्षणीया-

विधिबोधिनी ।

नां यः पुत्रकामो यः पशुकाम इत्याद्युतपत्तिवाक्ये फलानां युगपदसम्बन्धात् । नचार्थस्य नाना-विधस्य उत्पत्त्ययोगित्वान्महेन्द्रादितत्तल्लोकवासादीनामेकदोत्पत्त्यसम्भवादिति व्याख्यानं युक्तमिति वाच्यं, तड़ागोत्सर्गादौ एकस्मात् कर्मणः क्रमिकनानाफलोक्तेः । तथाच मत्स्यपुराणम् "एतन्महाराज विशेषधर्मान् करोति योऽर्थामतिशुद्धबुद्धिः । स याति रुद्रालयमाशु पूतः कल्पाननेकान् दिवि मोदते च ॥ अनेकलोकान् समहस्तपादान् भुक्त्वा परार्द्धद्वयमङ्गनाभिः । सहैव विष्णोः परमं पदं यत् प्राप्नोति तद्‌यागबलेन भूयः ॥" अथेहापि सर्वनामपदाभावादार्थवादिकफलानि समुच्चितान्येव कामनाविषयो लाघवात्, समुच्चितनानाफलविषयकविधिरप्येक एव कल्प्यते लाघवात् । न हि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्य्यायता सम्भवति वह्निसामीप्ये दाहप्रकाशयोः पर्य्यायताया अदर्शनात् । तस्मात् सकृदनुष्ठितेन कर्मणा यथैकं फलं निष्पाद्यते तथा बाधकं विना फलान्तरमपि विनिगमकाभावात् । ज्योतिष्टोमादेस्तु षष्टिवर्षावच्छिन्नफलश्रुतेः पृथगनुष्ठानादेव पृथक् फलसिद्धिरन्यथा षष्ठिसंख्याभिधानं व्यर्थं स्यात ।

गादाधरी

"व्यालग्राही यथा व्यालमि" त्यादिवचनैः पत्युर्नरकोद्धारादिफलसहितस्वर्गभोगस्य सहमरणफलत्वबोधनात् । अतएव एतन्महाराज विशेषधर्मानित्यादिवाक्यबोधितमहत्तपःप्रवृत्त्यनेकलोकभोगपूर्वकविष्णुलोकगमनादिफलकतड़ागादिकमपि केवलविष्णुलोकगमनादिफलकामनया शिष्टैरनुष्ठीयते । यदि च तादृशाचारबलात् प्रत्येकफलकामकर्तव्यताबोधकश्रुतिरपि तत्र कल्प्यत इत्युच्यते तदा प्रकृतेऽपि तादृशश्रुत्यन्तरमाचारवशादुपेयम् । तदुभयफलकामनयापि शिष्टानां सकृदनुष्ठितात् समुच्चितफलकामकर्तव्यत्वबोधकमपि श्रुत्यन्तरं गत्यन्तरविरहस्य तुल्यत्वादित्यलं विस्तरेण ।

अथ क्षेमसाधारणसाधनत्वस्य विध्यर्थत्वे न कलञ्जं भक्षयेदित्यादिनिषेधस्थले कलञ्जभक्षणेन तत्कृत्या वा प्रतियोगितयाऽन्वितेनाभावेन नरकनिवृत्तिरूपेष्टसाधनत्वस्यान्वयः किमिति नोपेयते ? बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्व (रूप)स्य पृथक् शक्त्या बलवदनिष्टासाधनत्वमात्रस्य वा विध्यर्थस्य क्रियायामभावबोधकत्वोपगमे व्युत्पत्त्यन्तरस्य कल्पनीयतया

गादाधरी

गौरवात् । नञर्थाभावे इष्टसाधनताबोधकत्वव्युतपत्तेरभावविधिस्थले भावतोऽप्यावश्यकत्वात् । न चैवमभावविधिवत् निषेधोऽप्यभावप्रवर्तक एव स्यात, न तु प्रतियोगिगोचरनिवृत्तिप्रयोजकः, प्रतियोगिनि द्विष्टसाधनत्वाबोधनादिति वाच्यम् । प्रतियोगिनो द्विष्टसाधनतां विना तदभावस्य द्विष्टाभावसाधनत्वानुपपत्त्या उत्तरकालं तत् कल्पनया प्रतियोगिगोचरनिवृत्तिनिर्वाहात् । न च विधिनिषेधयोरविशेषः । भावरूपेष्टसाधनताया विधिस्थले निषेधस्थले चाभावरूपतत् साधनताया बोध इति विशेषात् ।

विधिबोधिनी

यत्र तु कर्मफले कालविशेषो नोक्तस्तत्रापि तत्तत् कर्मसम्पादकानुरूपेण कालविशेषो बोध्यः, फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यादिति न्यायादिति संक्षेपः ।

निषेधवाक्याभावविध्यो विध्यर्थतान्वयं विचारयन् समासतो विध्यर्थनिर्णयमुपसंहर्तुं पूर्वपक्षमुत्थाप्य तन्निराकरोति "अथेति" । क्षेमसाधारणस्य प्रयोजकसामान्यस्य साधनताज्ञानस्य प्रवृत्तिहेतुत्वं युक्तमेव । मीमांसकोक्तद्वेषघटितसामग्र्यकल्पनमयुक्तम् । तथाच स्वरूपयोग्यत्वरूपं क्षेमसाधारणसाधनत्वे न काचिदनुपपत्तिः व्यापकतावच्छेदकत्वप्रवेशादित्यर्थः । एवञ्चात्र फलोपधायकत्वक्षेमसाधारणसाधनत्वं न गृहीतं दण्डाद् घट इति प्रतीतिविरोधापत्तेः । अरण्यस्थदण्डे फलसाधनत्वाभावादिति भावः ।

एवञ्च नित्यविधिस्थले शौचफलकामनयोरुभयोरधिकारत्वेऽपि शौचे पृथगधिकारत्वं फलकामनायां च पृथगधिकारत्वं वाच्यमेव । तथाच फलकामनाशून्यस्यापि शौचादिमतोऽधिकारितया नित्याकरणे तस्यापि प्रत्यवायं जनयेदितिभावः । कृतित्वरूपशक्यत्वावच्छेदकस्य लाघवादाह "तत्कृत्यावे"ति । भोजनसामान्याभावरूपोपवास इष्टसाधनमितिबोधान्नञर्थेऽभावे इष्टसाधनत्वबोधकत्वव्युत् पत्तिस्वीकारस्यावश्यकत्वेन "न कलञ्जं भक्षयेदि"तिनिषेधस्थले विध्यर्थस्य क्रियायामभावबोधकत्वोगमे व्युत्पत्त्यन्तरकल्पनाप्रयुक्तं गौरवम् । अभावविधिस्थले कल्पितव्युत् पत्त्यन्तरस्यान्वयानुपपत्तिश्चेतिबोध्यम् । अभावविधिस्थले कल्पितव्युत्पत्त्यन्तरस्यान्वयानुपपत्तिश्चेति बोध्यम् । अभावविधिश्च जन्मतिथावामिषं परिहरेदेकादश्यामु-

गादाधरी

न चाभावविधिस्थलेऽपि अभावे इष्टसाधनतान्वयमनभ्युपगम्य प्रतियोगिन्येवेष्टाभावसाधनत्वरूपानिष्टसाधनत्वबोधः किन्नोपेयते, प्रतियोगिन इष्टाभावसाधनत्वमभावस्येष्टसाधनत्वनिर्वाह्यमित्युत्तरकालमभावे इष्टसाधनत्वकल्पनयैव तद्गोचरप्रवृत्तिनिर्वाहसम्भवादिति वाच्यम्।

विधिबोधिनी

पवसेदित्यादिरूपः। निषेधश्च न कलञ्जं भक्षयेत् चैत्यं न वन्देतेत्यादिरूपः। तथाच एकादश्यामुपवासो यथा प्रत्यवायपरिहारविष्णुलोकप्राप्त्यादिरूपमिष्टं साधयति तथा कलञ्जभक्षणाभावो न किञ्चिदिष्टं जनयति। परं भक्षणे नरकं समुत्पादयतीत्यनयोः पार्थक्यम्। विधिसामान्यस्य प्रवर्त्तकत्वं निषेधस्य तु निवर्तकत्वमिति नियमान्निषेधे नाभावप्रवर्तकत्वं सम्भवति। कलञ्जभक्षणे इष्टसाधनत्वस्य विध्यर्थत्वे न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणाभाव इष्टसाधनमितिबोधे च कलञ्जभक्षणे प्रतियोगिनि द्विष्टसाधनत्वबोधस्यानिर्वाहान्निषेधोऽप्यभावविधिवत् प्रवर्तकः स्यादिति पूर्वपक्षिणामाशयः। अपिच यथा प्रतियोगिनो द्विष्टसाधनतां विना तदभावस्य द्विष्टाभावसाधनत्वानुपपत्त्या उत्तरकालं तत्कल्पनया प्रतियोगिगोचरनिवृत्तिनिर्वाहः तथाऽभावविधिस्थलेऽपि प्रतियोगिन इष्टाभावसाधनत्वमभावस्येष्टसाधनत्वनिर्वाह्यमित्युत्तरकालमभावे इष्टसाधनत्वकल्पनयैव तद्गोचरप्रवृत्तिनिर्वाहसम्भव इति पूर्वपक्षं निराकरोति — एकादश्यामुपवसेदित्यादिना। धात्वर्थ उपवासे भोजनाभावरूपे प्रतियोगि भोजनविशेष्यतयैवाभावस्यान्तर्भावान्न पूर्वशङ्कितकल्पनासम्भव इति भावः। एवञ्च प्रतियोगिन्यनिष्टसाधनत्वरूपविध्यर्थस्याभावस्य बोधासम्भवेन "न भुञ्जीतोपवसेदि" त्यनयोरेकरूपबोधजनकतानुभवानुरोधेन स्वीकर्तव्यमिष्टसाधनताबोध - जनकत्वस्याभावेऽन्वयः सर्वत्र भावविधिस्थले।

गादाधरी

एकादश्यामुपवसेत् जन्मतिथावामिषं परिहरेदित्याद्यभावविधौ धात्वर्थ एवाभावस्य प्रतियोगिभोजनादिविशेष्यतयाऽन्तर्भावात्। अनिष्टासाधनत्वरूपविध्यर्थाभावस्य प्रतियोगिनि बोधासम्भवेन न भुञ्जीत उपवसेदित्यादिविधिवाक्यानामुभयसिद्धविलक्षणबोधजनकतानुभवानुरोधेनाभावे इष्टसाधनताबोधस्यैव सर्वत्राभावविधिस्थले स्वीकर्तुमुचितत्वात्।

विधिबोधिनी।

बोधासम्भवेनेति। एकदेशेऽन्वयस्याव्युत्पन्नतया धात्वर्थैकदेशे भोजनेऽनिष्टासाधनत्वरूपविध्यर्थाभावस्यान्वयासम्भव एवेति भावः।

इदमत्रावधेयम्-न कलञ्जं भक्षयेदित्यादिनिषेधविधेः प्रामाण्यानुरोधेन बलवदनिष्टा (ननुबन्धित्व)-जनकत्वस्य विध्यर्थे प्रवेश आवश्यक एव, निषिद्धेऽपि कलञ्जभक्षणादौ तृप्त्यादिरूपेष्टसाधनत्वसत्त्वेन तदभावस्य नञा बोधने निषेधविधेः प्रामाण्यमनुपपन्नं स्यादिति बलवदनिष्टाननुबन्धित्वस्य विधित्वे तस्य बलवदनिष्टाननुबन्धित्वस्यैवाभावो नञा बलवदनिष्टरूपनरकादिजनके कलञ्जभक्षणादि कर्मणि बोध्यत इति तादृशेष्टसाधनत्वे बलवदनिष्टाननुबन्धित्वाभावात्। विशेषणाभावप्रयुक्त विशिष्टाभावसत्त्वादिति भावः। बलवदनिष्टसाधनत्वज्ञानं च द्वेषसामग्रीत्वेनेच्छाप्रतिबन्धकं न तु तदसाधनत्वज्ञानमिच्छाहेतुरिति बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वस्य विशेष्यविशेषणभावे ज्ञानान्तरकल्पनाभावप्रयुक्तलाघवरूपस्य विनिगमकस्य सत्त्वेऽपि तथाविधस्य विशिष्टस्य वाच्यत्वे 'श्येनेनाभिचरन् यजेते'त्यत्र विध्यर्थबाधेन तद्विधायकश्रुतेरप्रामाण्यप्रसङ्गादिति श्येने केवलेष्टसाधनताबोधस्य चोपगमार्थं खण्डशः शक्तिः स्वीकार्य्या। अतएव मणिकृता तथाविधश्येने बलवदनिष्टासाधनत्वस्याभानं लिखितम्। तदभानं तु विशिष्टशक्तिस्वीकार पक्षे न सम्भवति। तत्र च केवलेष्टसाधनत्वेऽपि शक्यतावच्छेदकपर्य्याप्तेः सत्त्वात् केवलेष्टसाधनत्वप्रकारकोऽपि बोधः स्यादेव। एवञ्च बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वयोः खण्डशः शक्तिस्वीकारे श्येनादावनिष्टासाधनत्वांशं परित्यज्य केवलेष्टसाधनत्वमात्रस्य विधिवाक्याद्द बोधोपगमे "वायव्यं श्वेतमालभेत भूतिकाम" इत्यादावप्यनिष्टासाधनत्वांशं परित्यज्य वायव्यादिपश्वालम्भनस्य स्वर्गजनकत्वेनेष्टसाधनत्वस्य बोधोपगमेऽनिष्टासाधनत्वस्य विधिवाक्येनाबोधनात् हिंसारूपत्वेन तस्य नरकसाधनत्वं न स्यात्। तथासति 'मा हिंस्यादि'त्यनेन हिंसाया अनिष्ट-

गादाधरी

मैवं । रात्रौ श्राद्धं न कुर्वीतामावास्यायां श्राद्धं कुर्वीतेत्यादावेकक्रियावैयर्थ्य-भयेन नञः पर्य्युदासत्वासम्भवेन तदभावस्य नरकाभावासाधनतया क्रियाया-मिष्टसाधनत्वाभावबोधस्यावश्याभ्युपेयतया क्रियायां लिङर्थाभावबोधकताया नञो व्युत्पन्नत्वान्निषेधान्तरस्थलेऽपि तत्र तदभावबोधे बाधकाभावात् । अभावविधावेव तत्रेष्टसाधनताबोधात् ।

विधिबोधिनी

साधनत्वश्रुतेरविरोधात् सांख्यमतानुप्रवेशः प्रसज्येतेति नाशङ्कनीयम् । मा हिंस्यादित्यत्र यागाङ्गहिंसातिरिक्तहिंसाया अनिष्टसाधनत्वज्ञापनात् । तथाच ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्रैव सामान्यविधेर्विशेषेतरपरत्वं व्युत्पत्तिसिद्धमिति मा हिंस्यादित्यत्र सङ्कोच एवेति संक्षेपः ।

क्रियायामिष्टसाधनत्वाभावबोधकत्वान्वये व्युत्पत्त्यन्तरकल्पनाप्रयुक्तं गौरवमिति यत् प्रागभिहितं तन्न समीचीनमिति मैवमित्यादिना ग्रन्थेन प्रदर्शयन्नुपपादयति । 'रात्रौ श्राद्धं न कुर्वीतामावास्यायां कुर्वीते'त्यादौ "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥" इत्यभियुक्तोक्तेरत्र नञः क्रियान्वयित्वेनात्यन्ताभावबोधकतया प्रतिषेधे मुख्यत्वात सम्भेदे नान्यतरवैयर्थ्यमिति नयादत्र कुर्वीतेति क्रिययोरन्यतरवैयर्थ्यभयाच्च तस्य (नञः) पर्य्युदासत्वार्थकत्वासम्भवेन प्रसज्यप्रतिषेधार्थकत्वस्य स्वीकर्तव्यत्वेन च क्रियायां लिङर्थाभाव-बोधकताया नञो व्युत्पन्नत्वान्न कलञ्जं भक्षयेदित्यादिनिषेधान्तरस्थलेऽपि तदभावबोधे बाधकाभावादिति । "सम्भेदे नान्यतरवैयर्थ्य"मिति सम्भेदे मिलने सतीत्यर्थः । "यद्यपि सम्भेदः सिन्धुसङ्गम" इत्यमरकोषेऽभिहितं तथाप्यत्र सङ्गममात्रं गृहीतम् । गुरुमतेऽपि न कलञ्जमित्यत्र कलञ्जभक्षणाभावविषयकं कार्य्यमितिबोधेनाभावविशेष्यकबोधेऽपि प्रतिषेधस्य प्राधान्यात् । प्रसज्यप्रतिषेधशब्दस्य व्युत्पत्तिस्तु प्रसज्यविधायार्थाद् विहितस्य प्रतिषेध इति । तत्र कालविशेषानुपादानान्निषिध्यमानक्रियायां प्रवृत्तिमतो निषेधविधावधिकाराद् यावत् कालमेव तस्यां तस्य निवृत्तिरिति स्मार्तभट्टाचार्य्याः । तथाच गुरुमते क्वचिद् विधेरप्राधान्येन

क्वचिच्च प्रतिषेधस्य प्राधान्येनेति व्यस्तमेव प्रसज्यप्रतिषेधप्रबोधप्रयोजकमिति मिश्राः।

शूलपाणिरघुनन्दनप्रमुखाः स्मृतिनिबन्धकारास्तु "रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते ॥" इतिमनुवचनस्य "राक्षसीति" निन्दार्थम्। "अचिरोदिते" दिवसस्याद्यघटिकायामिति व्याख्यां विधाय "सन्ध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः। तयोरपि च क्रर्तव्यं यदि स्याद् राहुदर्शनम्॥ राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम्। गुणवत् सर्वकामीयं पितॄणामुपतिष्ठते॥" इति विष्णुवचनमाचन्द्रतारकं यत उपतिष्ठतेऽतो रात्रावपि श्राद्धं कार्य्यमित्यभिधायात्र नञः पर्य्युदासपरत्वं स्वीचक्रुः। तेषामयमाशयः—फलप्रत्यवायशून्यतया समभिव्याहृतपदार्थभेदः पर्य्युदासः। तथाहि रात्रौ श्राद्धं न कुर्वीतेत्यादौ रात्रौ श्राद्धकरणे न फलं न वा प्रत्यवाय इति रात्री पर्य्युदस्ता तद्भिन्ना दिनावस्था नञा बोध्यते। अत्र च मीमांसकाः "पर्य्युदासः स विज्ञेयो यत्र पूर्वपदेन नञ्। प्रतिषेधः स विज्ञेयो यत्रोत्तरपदेन नञ्।" उत्तरपदं प्रत्ययः। तदन्यत् पूर्वपदम्। तत्र यदा प्रत्ययार्थभावनया सह नञः सम्बन्धस्तदा प्रतिषेधः। यदा तु प्रत्ययार्थभावनाव्यतिरिक्तेन धात्वर्थेन वा पदार्थेन सह नञः सम्बन्धस्तदा पर्य्युदासः। 'न कलञ्जं भक्षयेदि'त्यत्र लिङर्थप्रवर्तनया सह नञः सम्बन्धात् प्रसज्यप्रतिषेध एव। नञश्चैष स्वभावो यत् स्वसम्बन्धिप्रतिपक्षबोधकत्वम्। तदत्र प्रवर्तनाप्रतिपक्षभूतां निवर्तनां प्रतिपादयति। तथाच कलञ्जकर्मकभक्षणनिवर्तनेति बोध इति। न्यायनये तु बलवदनिष्टसाधनत्वविशिष्टेष्टसाधनत्वरूपस्य विध्यर्थस्याभावो नञ्। भक्षणक्रियायां बोध्यते तेन विधेरप्राधान्यं नञर्थाभावस्य च प्राधान्यमितिविशेषः। रात्रौ श्राद्धं न कुर्वीतेत्यत्र तु नञा पर्यूदासस्वीकारे निषेधरूपमुख्यार्थस्य बाधाल्लक्षणैव। श्राद्धनिषेधविधेरनुपपत्तिरेव लक्षणावीजम्। तथाच प्रसक्तं हि प्रतिषिध्यत इति न्यायाद् रात्रौ श्राद्धप्राप्तिं विना श्राद्धनिषेधो न तत्र विधातुं शक्यते। प्राप्तिश्चामावास्यायां श्राद्धं कुर्वीतेति सामान्यशास्त्रात्। अतएव "अयञ्च षष्ठीनाड्यवच्छिन्नामावास्याविधिपूर्वको रात्र्यादिनिषेधः पर्य्युदासः सर्वत्र सामान्यशास्त्रप्राप्तनिषेधस्य पर्युदासत्वा"दिति श्राद्धविवेककृदुक्तिः सङ्गच्छते। अपिचामावास्यायां श्राद्धं कुर्वीतेत्येको विधिः। असति बाधके वाक्यमात्रस्यावच्छेदावच्छेदेन बोधतात्पर्य्यकत्वनियमादमावस्यावच्छेदेन श्राद्धकरणस्येष्टसाधनत्वं बोध्यते। एवञ्च रात्रौ श्राद्धं न कुर्वीतेत्यत्र नञः प्रसज्यप्रतिषेधपरत्वे रात्रौ श्राद्धकरणे विध्यर्थस्येष्टसाधनत्वस्याभावो लभ्यते; तथा च सति अमावास्यात्वावच्छेदेन श्राद्धकरणे इष्टसाधनत्वबोधकस्यामायां श्राद्धं कुर्य्यादितिविधिवाक्यस्याप्रामाण्यरूपो बाधः स्यादतो नञः पर्य्युदासपरत्वमभ्युपेयम्। एवञ्च सति वाक्यैकवाक्यतया रात्र्यादीतरस्यामावास्यायां श्राद्धं कुर्वीतेति विशिष्टविध्यर्थो लभ्यते।

अत्र च भेदप्रतियोगिनो रात्र्यादेः प्रसञ्जकममावास्यायां श्राद्धं कुर्वीतेत्युपजीव्यं विधिवाक्यम्। "प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदे न नञ्॥" इति नयादत्र नञान्योन्याभाव एव प्रतीयते। तथाच रात्रौ श्राद्धं न कुर्वीतेत्यत्र तु नञर्थस्य रात्रावित्यनेनान्वय इति लोगाक्षिभास्करादयोऽपि। नञः क्रियान्वयित्वेऽत्यन्ताभावबोधकतया गौणत्वमिति विवेकः। न च तथापि रात्रौ श्राद्धं न कुर्वीतेति निषेधविधिरेव युक्तोऽन्यथा पर्य्युदासेन सामान्यशास्त्रेणैकवाक्यत्वाभ्युगगमे एकक्रियावैयर्थ्यापत्तिरिति वाच्यम्। यथा चैत्रः पचतीत्यत्र तिङ्सुवेकवचनयोरेकत्वप्रतिपादकयोर्यथाच करोतीत्यत्र धातुतिङोः कृतिप्रतिपादकयोः सम्भेदे नान्यतरवैयर्थ्यं तथाच प्रकृतेऽपि सम्भवात्। केचित्तु सम्भेदेनाऽन्यतरवैयर्थ्यमिति सम्भेदेन प्रकृतिप्रत्यययोरेकार्थबोधकत्वेनैकतरस्य वैयर्थ्यं स्वीकुर्वन्ति। तन्न सम्यग्, वेदविधौ वैयर्थ्यस्य लक्षणाया वाऽयुक्तत्वादेको द्वावित्यादावन्ततः पदसाधुत्वार्थं विभक्तेरुपयोगाच्च। अत एव भट्टाचार्य्यपादैरेकक्रियावैयर्थ्यभयेन नञः पर्य्युदासत्वासम्भवेनेत्याद्युक्तम्। यदि नञो निषेधे मुख्यत्वान्निषेधविधिः स्यात् तदा सर्वत्रोपजीव्यस्य सामान्यविधेर्विरोधः स्यादतः पर्य्युदासे लक्षणैवेति स्मार्तसिद्धान्तः। वस्तुतस्तु सामान्यविधेर्यदि दिवा रात्रावपि तात्पर्य्यमस्ति तदा वचनशतस्यापि विधेस्तात्पर्य्यबाधाक्षमत्वाद् विकल्पे सिद्धे विधिवैषम्यं सिद्धमेव स्यात्। नास्ति चेत् तदा रात्रौ श्राद्धस्य प्रापकाभावादेवाभावस्य प्राप्ततया निषेधस्य विधित्वासम्भवात् सामान्यविधेस्तात्पर्य्यग्राहकमात्रतया पर्य्युदास एवेति तेषां तत्त्वमिति संक्षेपः। व्युत्पन्नत्वादिति प्रयोगानुसारित्वात् कल्पनाया इति भावः। "तत्रेति" तत्र क्रियायां तदभावबोधे लिङर्थाभावबोध इत्यर्थः। अभावविधिस्थले त्विष्टसाधनताबोधकत्वे बाधाभावात् तत्रैव तदन्वय इति।

पुनराशङ्कत अथेति। भोजनाभावादेरित्यत्यन्ताभावस्य नित्यतया तस्य कृतिसाध्यत्वस्यासम्भवादित्यर्थः। न हि नित्यं कृत्या निष्पाद्यते नित्यत्वभङ्गप्रसङ्गादिति भावः। एकदेति। एकस्मिन् काले एकस्मिन्नधिकरणेऽपीति वक्तव्यम्। एकस्मिन् समये भुतले घटस्य जले घटाभावस्य प्रवृत्तौ बाधकाभावात्। विघटनेन निवर्तकेनेत्यर्थः। तद्गोचरेति भोजनाभावादिगोचरप्रवृत्तावित्यर्थः। गोचरत्वं च जन्यज्ञानविषयत्वम्। तत्साधनत्वस्येतीष्टसाधनत्वस्येत्यर्थः। अन्यथाभावेऽप्रवृत्ताविति। प्रवृत्तित्वमत्र रागजन्यतावच्छेदकतया सिद्धो जातिविशेषः। प्रवृत्त्युपत्तिक्रमश्च प्रथमतः फलज्ञानं, ततः फलेच्छा, तत इष्टसाधनताज्ञानमुपाये। तत उपायेच्छा। ततः प्रवृत्तिः। "चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेदि"ति कारिकावली। प्राणपञ्चकेति प्राणादिवायुपञ्चकेत्यर्थः। स चैकोऽपि

विधिबोधिनी

हृदादिस्थानभेदात् प्राणादिसंज्ञां लभते। उक्तं च "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥" इति। तथाच मुखनासिकाभ्यां निष्क्रमण-प्रवेशनात् प्राणः। मलादीनामधोनयनादपानः। आहारेषु पाकार्थं वह्नेः समुन्नयनात् समानः। ऊर्ध्वं नयनादुदानः। नाड़ीमुखेषु विततनाद् व्यानः। क्रियाभेदादपि "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकरः क्षुत् करे ज्ञेयो देवदत्तो विजृम्भते। न जहाति मृतं चापि सर्वव्यापी धनञ्जयः" इत्यादयो द्रष्टव्याः, तस्य सञ्चाराभावे मुखनासिकयो र्निर्गमादि-क्रियाविशेषाभावे इत्यर्थः। कुम्भकेऽन्तःस्तम्भवृत्तौ तस्य च स्तम्भपरिणामत्वेन पूरक-रेचकवत् प्रयत्नसाध्यत्वाभावादित्यभिप्रायः। प्राणायामेति। "तस्मिन् सति श्वासप्रश्वासयो-र्गतिविच्छेदः प्राणायामः (पातः सूः पादः २ सूः ४९)। तस्मिन्नासनस्थैर्य्ये सतीत्यर्थः। प्राण-वायोर्गतिविच्छेदकारकव्यापारविशेषः। तथाच प्रयत्नसाध्यतानुपपत्त्या प्राणायामेऽप्रवृत्ति-प्रसङ्गात् क्रियाविरहस्य "तत् साध्यतायाः" कृतिसाध्यताया इत्यर्थः; उपपादनीयत्वादित्यर्थः।

गादाधरी

अथ भोजनाभावादेरजन्यस्य कृत्यसाध्यतया तत्र प्रवृत्तेरसम्भवात् कथमुपवसेदित्यादेरभावविधित्वमिति चेत्। सत्यम्, एकदा प्रतियोग्यभावयोर-प्रवृत्तेस्तयोरेकगोचरप्रवृत्तावपरगोचरप्रवृत्तेः प्रतिबन्धकतया भोजनाद्यभावकृते भोजनाद्यनुकूलकृतिविघटनेन भोजनाद्यभावस्य निर्वाहकत्वात्। तद् गोचरप्रवृत्तौ क्षेमसाधारणतत्साधनत्वस्याक्षततवेन तस्यापि कृतिसाध्यत्वात्। अभावेऽप्रवृत्तौ प्राणपञ्चसञ्चाराभावेऽप्रवृत्त्या कुम्भकस्य प्रयत्नसाध्यतानुपपत्त्या प्राणायामस्य प्रयत्नसाध्यतानुपपत्तेश्च। क्रियाविरहस्य तत्साध्यताया अवश्योपपादनीयत्वात्।

विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधि-श्चेति। कर्मादेः प्राथमिकप्राप्तिर्यतः स उत् पत्तिविधिः। प्रथमप्राप्तेरुत् पत्ति-त्वात्। प्राप्तिः प्रवृत्तिविषयताप्रयोजकप्रतीतिः। दध्ना जुहोतीत्यादेः प्रमाणान्तरप्राप्तहोमादिकमनूद्य दध्यादिरूपगुणविधायकस्य होमादिकर्मोत्-पादकत्वाभावात्। प्राप्तौ प्राथमिकत्वविशेषणम्।

विधिबोधिनी

अत्र तर्कमते विध्यर्थो निष्कर्षो यदाहु र्गदाधरभट्टाचार्य्यपादा व्युत्पत्तिवादे अत्र वदन्ति द्वेषविषयतावच्छेदकत्वोपलक्षितनरकत्वाद्याश्रयसाधनतात्वावच्छिन्नप्रतियोगिताकाभावकूटे तादृशाभावत्वेनानुगते एकैव विधिप्रत्ययस्य शक्तिः। उपलक्षणीभूतद्वेषेऽपि विषयतावच्छेदकत्वं परित्यज्य नरकाद्यसाधनत्वं प्रतीयते। कुत्रचिन्नरकासाधनत्वं कुत्रचिद् रोगासाधनत्वं प्रतीयत इत्यत्र तात्पर्य्यमेव नियामकम्। प्रतियोगितायाः प्रकारतया भानात् प्रतियोगितावच्छेदकघटकनरकत्वादौ द्वेषविषयतावच्छेदकत्वस्योपलक्षणतया शक्तिग्रहे भानमविरुद्धमिति। तथाच यथा तत्पदस्थले तत्पदेनोपलक्षणीभूतबुद्धिविषयतावच्छेदकत्वं परित्यज्य घटादिकं प्रतीयते तथाऽत्राऽप्युपलक्षणीभूतं यद् द्वेषविषयतावच्छेदकं तत्परित्यज्य नरकाद्यसाधनत्वं विधिप्रत्ययेन प्रतीयते। एवञ्च शाकादिभोजनेन नरकाद्यसम्भवात् तत्र रोगाजनकत्वं विध्यर्थ स्तदभावः "शाकंन भोजयेदि"त्यादौ नञा बोध्यते तथा कलञ्जभक्षणे रोगाद्यसम्भवात् तत्र नरकासाधनत्वं विध्यर्थस्तदभावो "न कलञ्जं भक्षयेदि"त्यादौ नञा बोध्यते इत्यवधेयम्। प्रतियोगिताया अभावे प्रकारता च स्वनिरूपकत्वसम्बन्धेन। यत्र प्रतियोगितायाः संसर्गमर्यादया भानं तत्र प्रतियोगिकोटिप्रविष्टोपलक्षणीभूतधर्मस्य शक्तिग्रहादौ न भानम्। प्रतियोगितासम्बन्धेन प्रतियोगिप्रकारकज्ञाने एव प्रतियोगिकोटावुपलक्षणप्रकारकाऽभाननियमादिति भट्टाचार्य्यग्रन्थस्वरसादिति संक्षेपः।

विधेर्लक्षणं विधाय विभागेन स्वरूपं निरूपयति विधिश्चतुर्विधेति। कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। तत्स्वरूपं द्रव्यं देवता चेति द्विविधमिति मीमांसान्यायप्रकाशः। अत्र प्राथमिकप्राप्तिरेवोत्पत्तिपदार्थः। तथाच कर्मोत्पत्तिवाक्ये कर्मणः, गुणवाक्ये गुणस्य, सगुणकर्मोत्पत्तिवाक्ये गुणविशिष्टकर्मणश्चोत्पत्तेरुपलभ्यमानत्वात् त्रैविध्यमिति दर्शयति कश्चित्त्रयेण। अग्निहोत्रं जुहोतीतिवाक्ये इदं कर्माग्निहोत्रं नाम यागकर्म प्राथम्येन कर्तव्यत्वेन विधीयते। दध्ना जुहोतीति गुणवाक्ये विहिते कर्मणि तदङ्गतया दधिरूपद्रव्यस्य मानान्तराप्राप्तत्वाद् विधेयत्वेन प्राथमिकप्राप्तित्वेनोत्पत्तिविधित्वम्। द्रव्यदेवतयोरेव गुणत्वादत्र प्राप्तेऽग्निहोत्रादिकर्मणि द्रव्यस्याप्राप्तत्वादनेन वाक्येन दधिरूपस्याप्राप्तस्य विधानान्मानान्तराज्ञातत्वेन विधित्वमित्यर्थः। सोमेन यजेतेति सगुणकर्मोत्पत्तिवाक्ये यथा सोमनामधेयस्य यागस्य प्राथमिककर्तव्यबोधकत्वं वर्तते तथा सोमलतारूपगुणस्यापि तथाविधानात् सोमलताविशिष्टयागस्य प्रतीते गुणेन सहितस्य कर्मण उत्पत्तिविधानाद् गुणविशिष्टकर्मोत्पादकत्वमित्यर्थः। नन्वेवमुपसद्भिश्चरित्वा मासमग्निहोत्रं जहोतीतिवाक्यमपि प्राप्ते यावज्जीवमग्निहोत्रं जुहुयादिति विधिवाक्ये सतिलव्रीहिरूपोपसद्भिर्गुणविधानात् दध्ना जुहोतीतिवाक्यवत् प्राप्ते कर्मणि गुणमात्रविधायकरूपमुत्पत्तिविधित्वं किं

न स्यादित्यत आह उपसद्भिरिति। तथाच तथा सति वाक्यभेदप्रसङ्गादिति। इदमत्रावधेयम्। कुण्डपायिनामयने श्रूयते उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति। अत्र प्राप्तं नित्याग्निहोत्रमनूद्य मासाग्निहोत्रवाक्यं कालादेर्विधायकत्वाद् गुणविधिरेवास्तामिति पूर्वपक्षे जैमिनिसूत्रम् "प्रकरणान्तरे प्रयोजनान्यत्वम्" (२।३।२३) मासाग्निहोत्रवाक्यं तावदयनप्रकरणे पठितत्वात् कर्मान्तरविधायकमित्यर्थः। वाक्यभेदभिया गुणविधित्वकल्पने कालरूपस्य मासस्य होमविशेषरूपस्योपसदश्च गुणद्वयस्य विधाने पुनर्वाक्यभेदप्रसङ्गः। उक्तं च "प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नत इतिनियमात्। अपिचेदमग्निहोत्रप्रकरणे न पठितमपित्वयनप्येकरणे पठितमित्यसन्निधानादेव न पूर्वस्य नित्याग्निहोत्रस्य प्रत्यभिज्ञा। एवञ्च सति पूर्वकर्मणा सह नाभिन्नत्वस्य न च गुणविधित्वस्य वाशङ्का। प्रकरणान्तरादेव कर्मभेदः कर्मभेदादेव च न वाक्यभेदाशङ्का। न वा यावज्जीवादिकालेन सह मासादिकालस्य विकल्पाशङ्का। कुण्डपायिनामयननामककर्मण्यग्निहोत्रानुष्ठानं कर्तव्यमिति विधानं चैतद्वाक्यस्य प्रयोजनमिति। एवं सन्निधौ फलभेदादपि कर्मभेदो ज्ञातव्यः। एकविशेष्यतानिरूपितविशेषणतापन्नयोरिति। नीलघटवद् भुतलमित्यादिस्थले द्रष्टव्यम्। प्रपञ्चितं चैतद् विशेषणद्वयनिरूपितविशेष्यतयोरभेदयोरवच्छेद्यावच्छेदकस्य वेति ग्रन्थव्याख्यानावसरे। प्राधान्येनेति। प्राधान्येन स्वतन्त्रेन इतरसत्तानधीनसत्ताकत्वेनेतियावत्। अतएव परस्परापेक्षाविरहोक्तिः। अनुवाद्यविशेष्यताविधेयताभेदेनेति। अनुवाद्यत्वं च प्रमाणान्तरसिद्धस्य किञ्चिद्धर्मविधानार्थं पुनरुपन्यास्यत्वम्। तथाचात्र नित्याग्निहोत्रमनूद्य न मासाग्निहोत्रविधिरिति पृथगेव कर्मद्वयमिति तातपर्य्यम्। विशेष्यता च स्वरूपसम्बन्धावच्छिन्नाधाराधेयभावः सन्निकर्षविशेषः। विधेयता चोद्दश्ये प्रकारतया ज्ञायमानो विलक्षणविषयतावान् पदार्थः। द्वयोरेव प्रधानत्वेन प्रतीतेः परस्परनिरूप्यनिरूपकभावानापन्नविषयतावत्त्वेन तत्तदर्थविषयकप्रतीतिरूपविशृङ्खलतयाऽपेक्षाविरहाद् वाक्यभेद इति समुदितविषयसंक्षेपः।

क्रमप्राप्तं विनियोगविधिं निरूपयति विनियोगविधिश्चेति। अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिरिति न्यायप्रकाशोऽर्थसंग्रहश्च। तथाच वक्ष्यमाणश्रुत्यादिसहकारेणानेन विधिनाऽङ्गत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपपारार्थ्यं ज्ञाप्यते। मीमांसापरिभाषापाठस्तु 'तच्चाङ्गत्वं शेषत्वं पारार्थ्यमिति यावत्। परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यमिति। उक्तञ्च जैमिनीयसूत्रे "शेषः परार्थत्वात्" (३।१।२) "या परोपकारे वर्तते स शेष" इति शवरभाष्यम्। परोद्देशेन प्रवर्तमानो गुणीभूतपदार्थः शेष इत्यर्थः। यथाऽग्निहोत्रं जुहोतीति प्रधानविधौ दधिसम्बन्धो नैव बोध्यते। दध्ना जुहोतीत्यङ्गविधावपि कुत्र दधिहोम इत्यपि नावबुध्यते तच्च तदधिकरणत्वं किंनिष्ठम् इत्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति

अतोऽङ्गस्य दध्नः प्रधानेनाग्निहोत्रादिना सम्बन्धस्य बोधनात् तृतीयया श्रुत्या प्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति। उक्तञ्च मीमांसापरिभाषायां प्रयाजादीनां दर्शपौर्णमासोद्देशेन प्रवृत्तकृतिव्याप्यत्वाल्लक्षणसङ्गतिः, दर्शादिः प्रयाजाद्युद्देशेन प्रवृत्तकृतिविषयत्वाभावान्नातिव्याप्तिः, केवलप्रयाजादीनुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेरिति। विनियोगविधित्वापत्तिरिति विनियोगविधावतिव्याप्तिरित्यर्थः। तत्रोत्पत्तिविधे बिनियोगविधौ लक्षणसमन्वयादिति भावः। इष्टत्वादिति। यथा फलभेदादिना कर्मभेदस्तथाऽत्राप्येकविधेरेव क्रियाकर्तव्यता-पुरुषार्थोपयोगितारूपफलभेदेन विधिद्वयकल्पने बाधकाभावोऽत औचित्यादिति। न प्रत्यक्ष इति न शाब्दप्रत्यक्ष इत्यर्थः। कल्प्योऽनुमेय इत्यर्थः। स च यथायं मन्त्रोऽस्मिन् कर्मणि विनियुक्तस्तथाविधार्थ प्रकाशनसामर्थ्यादिति। लिङ्गञ्च सामर्थ्यम्। "सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते" इति न्यायप्रकाशः। मन्त्रस्य विनियोगेति विनियोगश्च "अनेनेदं तु कर्तव्यं विनियोगः प्रकीर्तितः" इतिमिश्राः। क्रियाप्रवृत्तावनुष्ठानक्रमविधानरूपविनियोगज्ञानमपेक्षितं, तथाच योगियाज्ञवल्क्यः "आर्षछन्दश्च दैवत्यं बिनियोगस्तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः" इति। वर्हिः कुशः, देवानां सदनं सीदत्यस्मिन्निति सदनमासनं दामि छिनद्मि। देवानामासनं कुशं लुनामीत्यर्थः। न तु कुशतुल्यं तृणान्तरं तत्र मुख्यार्थाभावादित्यादि शावरभाष्यं द्रष्टव्यम्। अस्य मन्त्रस्यार्थप्रकाशनरूपलिङ्गात् सामर्थ्यादेव लवनाङ्गत्वम्। तदुक्तं क्षमता चेति। "श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहितानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या"॥ इति। क्रव्यादंशप्रक्षेपप्रकाशकेति। "क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाह" इत्यादिमन्त्रः क्रव्यादंश (राक्षसांश) परित्यागप्रकाशकः। अतएव होमार्थगृहीतश्रोत्रियागारस्थितादिशुद्धाग्नेरंशविशेषमनेन मन्त्रेण प्रक्षिप्यते। "प्रहिणोमीति" पदसामर्थ्यादिति भावः। श्रुतिलिङ्गयोर्विरोधे श्रुतेरेव प्राबल्यं न तु लिङ्गस्येति प्रतिपादयितुमुपक्रमते यत्रेति। अत्रेदं ज्ञातव्यम् तच्चलिङ्गं द्विविधम्। सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षं तदपेक्षञ्चेति। यदन्तरेण यन्न सम्भवत्येव तस्य तदङ्गत्वं तदनपेक्षं केवललिङ्गादेव। यथा अर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम्। ज्ञानमन्तरा कर्मस्वरूपस्यैवाज्ञानात् मन्त्रार्थज्ञानमन्तरा चानुष्ठेयार्थविषयकनियतस्मरणासम्भवाच्च। यदन्तरेण यत् सम्भवति तस्य तदर्थत्वं तदपेक्षम्। यथाऽस्य मन्त्रस्य लवनाङ्गत्वम। लवनं हि मन्त्रं विनाप्युपायान्तरेण ध्यानादिना स्मृत्वा कर्तुं शक्यम्, अतो न मन्त्रो लवनस्वरूपार्थः किन्त्वपूर्वसाधनीभूतलवनप्रकाशनार्थः। दर्शपौर्णमासप्रकरणे मन्त्रस्य पाठादनेन मन्थण तत् सम्बन्धि किञ्चित प्रकाश्यते। तच्च वर्हिसंस्कारद्वाराऽपूर्वसम्बन्धीति मन्त्रस्य पाठादनेन मन्त्रेण तत् सम्वन्धि किञ्चित् प्रकाश्यते। तच्च बर्हिसंस्कारद्वाराऽपूर्वसम्बन्धीति

गादाधरी

उत्पत्तिविधिश्च कश्चित् कर्ममात्रोत्पादकः यथा अग्निहोत्रं जुहोतीत्यादिः, कश्चिद् गुणविशिष्टकर्मोत्पादकः यथा सोमेन यजेतेत्यादिः ; तत्र-विशेषणीभवत्सोमादिद्रव्यस्याप्यप्राप्ततया विधेयत्वात्। कश्चित् प्राप्ते कर्मणि गुणमात्रविधायकः यथा दध्ना जुहोतीत्यादिः। उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीत्यादिश्च दध्ना जुहोतीतिवन्न यावज्जीवमग्निहोत्रं जुहोतीत्यादि-विधिप्राप्ताग्निहोत्रानुवादेन द्रव्यकालोभयविधिः। गुणद्वयस्य मिथो विशेष्य-विशेषणभावानापन्नस्य विधाने विधेयताभेदेन वाक्यभेदप्रसङ्गात्। विधेयता-द्वयस्य परस्परनिरूपकभावविरहेण तच्छालिधियो विश्रृङ्खलसमूहालम्बनरूपतया तज्जनकवाक्यस्यैकवाक्यत्वासम्भवादतोऽसौ गुणद्वयविशिष्टगौणाग्निहोत्र-पदार्थरूपकर्मान्तरविधिरेव ; तथा सति न वाक्यभेदः। इतरविशेषणतया विधेयकोटिनिविष्टयोरेकविशेष्यतानिरूपितविशेषणतापन्नयोर्विधेयघटकतया विधेयता-(विषयता)-द्वयस्य स्वनिरूपकविशेष्यताद्वारा निरूप्यनिरूपक (भाव)-सम्भवात्। प्राधान्येन द्वयोर्विधाने प्रधानयोः परस्परापेक्षाविरहेणानुवाद्यवि-शेष्यताविधेयताभेदेन विधेयद्वयविषयतयोर्विश्रृङ्खलतया तथा सत्येव वाक्यभेदात्।

विधिबोधिनी

मन्त्रस्य सामर्थ्यात् तदर्थत्वे सति नानर्थक्यं प्रसज्यते। तस्मात् "वहिर्देवसदनं दामी"त्यस्य प्रकरणाद् मन्त्रस्य दर्शपूर्णमाससम्बन्धितयाऽवगतस्य सामर्थ्याल्लवनाङ्गत्वमिति सिद्धमित्यापदेवः। शेषित्वमिति शेषित्वं तुद्देश्यत्वमेव। शेषत्वं च तदुद्देश्यकेच्छाविषयत्वम्। विलम्बेनैवेति। तथाच पर्य्यालोचनया मन्त्रस्यार्थावबोधे सत्येवेन्द्रप्रकाशनसामर्थ्यं ग्रहीतव्यम्। तत्पूर्वं स्वनिरपेक्षस्वरूपया श्रुत्या गार्हपत्योपस्थानकरणत्वं बोध्यत इति तदानीमिदानीमनेन मन्त्रेण किं करणीयमित्याकांक्षा-विरहान्न मन्त्रलिङ्गको विनियोगः। तदेव द्रढ़यति तदुक्तमित्यादिना। असङ्गत्यापत्तेरिति। गार्हपत्यार्थबोधनात् परमेन्द्रीपदस्य ऋग्विशेषे रूढ़ित्वमादाय तस्य तादृशार्थप्रकाशकत्वे ऐन्द्रीपदादेः सामर्थ्याभावात् सुतरां मन्त्रजन्यशाब्दबोधापेक्षा नास्त्येव। तथासत्युभयत्र विनियोगेऽसङ्गतिरेव स्यादिति।

विनियोगविधिश्च विनियोगेन परार्थतया अन्यविधेः परार्थत्वमेव च शेषत्वं, परोपकार्य्यत्वमेव शेषित्वमिति मीमांसापरिभाषा।

न च काम्यकर्मण उत्पादकस्य स्वर्गकामो यजेतेत्यादिविधेरपि विनियोगविधित्वापत्तिस्तत्र क्रियायाः पुरुषार्थसाधनत्वरूपशेषत्वेन विधानादिति वाच्यम्। तत्र क्रियायाः कृतिसाध्यतया विधानमादाय उत्पत्तिविधित्ववत् पुरुषार्थसाधनताविधानमादाय विनियोगविधित्वस्येष्टत्वात्। क्रियोत्पत्तिविधितः प्रथमं क्रियाकर्तव्यतयैव प्रतीयतेऽनन्तरं च कुत्रैतदुपयोग इत्याकाङ्क्षायां पुरुषार्थोपयोगिताप्रतीतिरिति फलभेदेनैकविधेरेवोभयविधित्वौचित्यात्। विनियोगविधिश्च यत्र न प्रत्यक्षस्तत्र मन्त्रलिङ्गादिना कल्प्यः। मन्त्रलिङ्गञ्च मन्त्रस्य विनियोगसाधनोपयोग्यर्थप्रकाशनसामर्थ्यं,तदुक्तं क्षमता च लिङ्गमिति। यथा वर्हिर्देवसदनं दामीत्यादि मन्त्रस्य वर्हिच्छेदादि विनियोगस्य लिङ्गविधया साधकं वर्हिच्छेदादिप्रकाशनसामर्थ्यम्।

तल्लिङ्गकानुमानं चायं मन्त्रो वर्हिच्छेदने विनियुक्तोऽसति बाधके तत्प्रकाशकत्वात्। यो मन्त्रोऽसति बाधके यत्कर्मप्रकाशकः स तत्र विनियुक्तः। क्रव्यादंशप्रक्षेपप्रकाशकतद्विनियुक्तक्रव्यादमग्निमित्यादिमन्त्रवदित्यादि। यत्र लिङ्गेनान्यत्र विनियोगः सेद्धुमर्हति श्रुत्या चान्यत्र तत्र श्रौत एव विनियोगः, न तु लैङ्गिकः, श्रुतिश्च विभक्त्यन्तपदश्रवणं, तदुक्तं श्रुतिर्द्वितीयेति। द्वितीयापदं विभक्तिमात्रोपलक्षकं यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र इन्द्रप्रकाशकमन्त्रस्य गार्हपत्योपस्थाने विनियोगसिद्धि र्न तु इन्द्रोपस्थाने। तथाहि तत्र द्वितीयाविभक्तिरूपश्रुत्या गार्हपत्याग्नेरुपस्थेयत्वरूपं शेषित्वम् "ऐन्द्र्या" "तृतीयया" चेन्द्रमन्त्रस्योपस्थानकरणत्वरूपं शेषत्वं झटिति बोध्यते। मन्त्रस्येन्द्रप्रकाशकतया लिङ्गेन चेन्द्रोपस्थापनकरणरूपत्वविनियोगसिद्धिश्च विलम्बेनैव। यतो मन्त्रस्य स्वार्थप्रकाशने सत्येवेन्द्रप्रकाशनसामर्थ्यं ग्रहीतव्यम्। तदनन्तरमेव च तादृशज्ञानादिन्द्रोपस्थापनकरणत्व-

गादाधरी

सिद्धिर्भविष्यति। ततपूर्वमेव मन्त्राधीनेन्द्रबोधनिरपेक्षया श्रुत्या गार्हपत्योपस्थापनकरणत्वं बोध्यते। एवञ्च विनियोगाकाङ्क्षाविरहान्न लैङ्गिको विनियोगश्च सिध्यति। तदुक्तं पार्थसारथिमिश्रैः श्रुतिलिङ्गाधिकरणे "यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते। तावदेव श्रुतिर्मन्त्रं गार्हपत्यार्थतां नयेदि"ति ॥ एतच्चैन्द्रीपदं ऋग्विशेषे रूढमित्याशयेन तस्य योगेनेन्द्रप्रकाशकत्वार्थकत्वे ऐन्द्रीपदादेरसामर्थ्यरूपलिङ्गज्ञानात् तत्र मन्त्रजन्यशाब्दबोधापेक्षाविरहेणासङ्गत्यापत्तेः। 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि'ति (जैमिनिः ३।३।१४) सूत्रोक्तं श्रुत्यपेक्षया लिङ्गस्य विलम्बेनार्थबोधकतया दौर्बल्यमपि निराकाङ्क्षतया विनियोगसाधकत्वमेव।

अथात्र श्रुतिमात्रेण न लिङ्गविरोधः. द्वितीयातृतीयाभ्यां प्रतियोग्यनुपरक्तशेषशेषिभावबोधनात्। तादृशस्य ऐन्द्र्याः शेषत्वस्य गार्हपत्ये शेषित्वस्य च भिन्नभिन्नप्रतियोगिसाधारणस्याविरोधादिति प्रतियोग्युपस्थापकसमभिव्याहृतगार्हपत्यादिपदसहकारेणैव प्रतियोगिविशेषोपरक्तयोः शेषशेषिभावो मन्त्रबोध्यशेषशेषिभावविरुद्धः श्रुत्या प्रतिपादनीयः। तथाच समभिव्याहृतपदसमुदायरूपवाक्येनैव विरोधः।

वाक्यस्य च लिङ्गापेक्षया दौर्बल्यमुक्तसूत्रसिद्धमिति कथं लैङ्गिकविनियोगविरोध इति चेत्। सत्यम्, मिश्रैरेव शेषशेषित्वमात्रं हि श्रुत्यैन्द्रीगार्हपत्ययोरुक्तः।

विधिबोधिनी

श्रुतिलिङ्गयोर्विरोधं विचारमुखेन प्रतिपादयितुमुपक्रमते अथात्रेति। श्रुतिमात्रेणेति ऐन्द्र्येति तृतीया गार्हपत्यमिति द्वितीयारूपश्रुतिमात्रेणेत्यर्थः। श्रुत्या तृतीयया द्वितीयया च ऐन्द्रगार्हपत्यरूपप्रतियोग्यनुपरक्त्या विभक्त्या केवलया शेषशेषिभावबोधनादित्यर्थः। अत्र प्रतियोगित्वं चान्वयित्वम्। तच्च स्वरूपसम्बन्धविशेषः। उपरक्तत्वञ्च सम्बन्धिभिन्नत्वे

विधिबोधिनी

सति सम्बन्ध्याश्रितत्वरूपसम्बन्धत्वमात्रम्। ऐन्द्रप्रतियोगिनो गार्हपत्यप्रतियोगित्वस्य भिन्नत्वान्न विरोधः किन्तु "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति समभिव्याहृतविशेषोपरत्योः पदयोर्वाक्यार्थान्वय एव शेषशेषिभावविरुद्धः। इदमत्र चिन्तनीयम् "कदाच नस्तरीरसि नेन्द्र सञ्चसि दासुषे" इत्यैन्द्र्या गार्हपत्यमुपतिष्ठते। मन्त्रार्थस्तु हे इन्द्र! कदाच कदापि नोऽस्माकं न तरीरसि न हन्तासि किन्तु दासुषे आहुतिं ददते सञ्चसि प्रीणासि। अस्य मन्त्र-लिङ्गादिन्द्रोपस्थानाङ्गत्वं प्राप्तं ततश्चेत्यैन्द्र्या ऋचा इन्द्रप्रकाशकमन्त्रेण गार्हपत्यनामानमग्निं पूजयेदित्यर्थः। यद्यैन्द्र्या उपतिष्ठते इत्येवं स्यात् तदा ऐन्द्र्या ऋचा इन्द्रमुपतिष्ठते इति लिङ्गादवबोधः स्यात् इन्द्रस्य तदानीं प्राधान्यप्रतीतेः। गार्हपत्यमुपतिष्ठत इति यदि तदा गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्यप्रधानकः स्यात् किन्तु गुणस्वरूपा काचित् क्रिया तत्र नोपलभ्यते। सुतरां गार्हपत्यस्य प्राधान्यमपि नावगम्यते। असत्यप्रधाने गुणे कस्य वा कस्माद्वा प्राधान्यप्रतीतिः?

गादाधरी

"अन्योन्यविषयनियमस्त्वेकवाक्यतः" इति कारिकया उक्तपूर्वपक्ष-माशंक्य "सत्यं वाक्यविरोधोऽस्ति श्रुतितोऽपि विरुध्यते। सहिते हि विरुध्येत न तु लिङ्गेन केवले।" इति समाहितम्। यद्यप्येतदपि समाधानं शिथिलं. तथाहि गार्हपत्यपदस्य लक्षणयेन्द्रपरत्वे द्वितीया आधारार्थकत्वे वा वाक्यस्य लिङ्गेनाविरोधनिर्वाहात्, द्वितीयान्तगार्हपत्यपदश्रवणमात्राद् योऽर्थः प्रतीयते तद्घटितवाक्यार्थस्यैव लैङ्गिकार्थविरोधेनास्तां श्रुत्यापि लिङ्गविरोधः, तथापि पदान्तरैकवाक्यतासहकृतश्रुतिलभ्यार्थस्य विलम्बेन प्रतीयमानतया केवलश्रुतिलभ्यस्य शीघ्रोपस्थितिकार्थस्याविरोधेन लिङ्गार्थबाधानुपपत्तेः। अन्यथा वाक्यमात्रस्य विरोधेनापि लिङ्गार्थबाधापत्तेः। तथापि शब्दविधया वाक्येन यो लिङ्गविरुद्धार्थः प्रकाश्यते सोऽपि लैङ्गिकार्थापेक्षया शीघ्रोपस्थितिकः वाक्यस्थैन्द्रीपदोपस्थापितमन्त्रजन्यशाब्दबोधसापेक्षलिङ्गज्ञानाधीनानुमित्यपेक्ष-तया प्रथमत एव श्रौतमुख्यार्थघटितवाक्यार्थस्य शाब्दबोधात्।

अतएवास्मात् काञ्चित् क्रियां प्रति गार्हपत्यप्रधानिका बुद्धिरुपपादनीया। तादृशीबुद्धिरुत्पादनं च श्रुतिविनियोगः। "ऐन्द्र्या उपतिष्ठत" इत्यंशेन मन्त्रविशेषः क्रियाविशेषश्च प्रतीयेते। अतः ऐन्द्र्या गार्हपत्यमुपतिष्ठते इतिश्रुतिवाक्यत ऐन्द्रमन्त्रेण गार्हपत्योपस्थानरूपा क्रिया सम्पादयितव्या इति पर्य्यवसितार्थो भवति। तथाच श्रुत्यनुसारेणैवैन्द्रयमन्त्रो गार्हपत्याङ्गः स्यात्। एवं श्रुतिलिङ्गयोर्विनियोगे विरोधः। उभययोः प्रधानत्वाङ्गीकारे च समुच्चयः। तथासति प्रतिप्रधानं गुण आवर्तनीय इति गुणस्योपस्थानस्य ऐन्द्रगार्हपत्ययोरङ्गत्वं प्रसज्येत। सामर्थ्यरूपेण लिङ्गेन वा श्रुतेरपि बाधः स्यात् इन्द्रप्रकाशनसामर्थ्यादिव तत्रैव विनियोगः कर्तव्यः। एवञ्चसति "वस्तुशक्त्यनुसारी हि सर्वःशब्दः प्रवर्तते" इतिनयात् मन्त्रस्य च लिङ्गेनेन्द्रोपसपनत्वप्रतीतेस्तत्रैव मन्त्रशक्तिः स्वीकर्त्तव्या, मन्त्रस्य चानुष्ठानकालेऽर्थस्मारकतया तस्यैवावश्यकत्वात् प्राधान्यं स्वीकार्य्यं न च श्रुतेः; उपजीव्येन प्रधानेन लिङ्गेन चोपजीवकस्य दुर्बलायाः श्रुतेर्बाध एव युक्तः। इत्यादिपूर्वपक्षे श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यमुत्तरोत्तरस्य दौर्बल्यमिति सूत्रार्थो ग्रहणीयः। साक्षाद् विनियोक्तृत्वेन श्रुतेः प्राबल्यम्। शब्दश्रवणानन्तरमेव यः सम्बन्धविशेषः प्रतीयते सैव श्रुतिपदवाच्या यथा गार्हपत्यमुपतिष्ठते इति। लिङ्गस्य तु श्रुतिकल्पनया विनियोक्तृत्वम्। तथाच मन्त्रगतानि पदानि स्वंस्वमर्थं प्रतिपाद्य तदनन्तरमर्थपर्य्यालोचनाद्वारा सामर्थ्यवन्ति भवन्तीति न शीघ्रप्रवृत्तिजनकानि। ततश्चाकाङ्क्षावशात साधनत्ववाचिनी तृतीया विभक्तिः प्राधान्यवाचिनी च द्वितीया विभक्तिरिति श्रुत्या कल्प्यते। ऐन्द्रमन्त्रेणेन्द्रमुंपतिष्ठेदितिविनियोगात् प्राक्श्रुत्या गार्हपत्योपस्थानं सम्पादितुमिति लिङ्गं तदानीं निराकाङ्क्षमेव। उक्तञ्च शास्त्रदीपिकायां "मन्त्रार्थो मन्त्रतो बुद्धच पश्चाच्छक्तिं निरूप्य च। मन्त्राकाङ्क्षावशे नेन्द्रशेषत्वे श्रुतिकल्पना ॥ श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्यङ्गतां गते। निराकाङ्क्षीकृते मन्त्रे निर्मूला श्रुतिकल्पना ॥ अतएवोक्तं "तत्र शीघ्रप्रवर्तिन्या"श्रुत्या लिङ्गस्य बाधनम्"। यतश्च 'न श्रुतेर्विनियोक्तृत्वं लिङ्गाधीनं प्रतीयते। विज्ञाते विनियोगे तु तद्वशाच्छक्तिनिर्णयः'॥ इति कुमारिलभट्टोक्तिस्वरसान्न विनियोगार्थं श्रुतिर्लिङ्गमुखापेक्षिनीति श्रुतेरुपजीवकत्वं लिङ्गस्य चोपजीव्यत्वमप्ययौक्तिमिति। शेषशेषित्वमात्रमिति। प्रतियोग्यनुपरक्तशेषशेषित्वमित्यर्थः। अस्य चोक्तमित्यनेनान्वयः। अन्यान्यविषयनियम इति। परस्परसाकाङ्क्षविषयसम्बन्ध इत्यर्थः। एकवाक्यत इति। अर्थैकवाक्यत इत्यर्थः। अर्थैकवाक्यत्वं च "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्" (जैःसूः २।१।४६) इति सूत्रप्रतिपादितं "विभागे वाक्यघटकपदानां विभागे साकाङ्क्षमेकपदरहितस्यापरपदस्य साकाङ्क्षत्वे सत्येकफलप्रतिपादकं यत्तदेकवाक्यमिति वृहतीव्याख्यानलब्धं बोध्यम्। तथाच यत्र भिन्नभिन्नसंसर्गप्रतिपादकयोराकाङ्क्षावशेन

विधिबोधिनी

महावाक्यार्थबोधकत्वं तदेकवाक्यमित्यर्थः। निरूप्यनिरूपकभावापन्नविषयताशालिबोध-जनकत्वरूपविशिष्टैकार्थप्रतिपादकत्वमेकवाक्यत्वमित्यवयवग्रन्थे गदाधरः। सहिते हीति। सहिते मिलिते वाक्य-विभक्त्यन्तपदश्रवणरूपश्रुतिलिङ्गेन विरुध्येतेऽतः श्रुतितोऽपि विरुध्यते; सहितविरोधे प्रत्येकस्यापि विरोधादितिभावः। न तु पूर्वोक्तयुक्त्या केवलश्रुत्या। अविरोधेऽपि केवलवाक्येन कथं न विरोध इत्यत आह "न तु केवले" इति, केवले वाक्यश्रुती न विरुध्येत इत्यनुषङ्गेनान्वयः। केवलश्रुत्या अविरोधस्य पूर्वमुक्तत्वात्। तथाच मिलिते एव वाक्यश्रुती लिङ्गेन विरुध्येते न तु केवले वाक्यश्रुती लिङ्गेन विरुध्यत इत्यर्थः शिथिलं दुर्बलमित्यर्थः।

गादाधरी

तथाच वाक्येनापि प्रकृते लिङ्गस्य निराकाङ्क्षता। वाक्यलिङ्गस्य बलीयस्त्वं च "स्योनं ते सदनं कृणोमी"त्यादावेव। तत्र सदनसादनधर्मकयोर्मन्त्रपूर्वोत्तरप्रतीकयोः प्रत्येकं सदनसादनार्थकत्वे गृहीत एव सादनस्य सदन-कल्पनप्रयोजकत्वं गृहीत्वा कल्पयामीत्यन्तेन किमर्थं सदनकरणमित्याकाङ्क्षो-त्थापनात् तदाकाङ्क्षातस्तस्मिन् सीदामृते इत्यादेः प्रवृत्तिरित्याकारकपरस्पर-साकाङ्क्षत्वरूपैकवाक्यताग्रहसम्भवात् तल्लिङ्गकेकार्थविनियोगसिद्धेः पूर्वमेव सदनसादनरूपार्थप्रकाशनसामर्थ्य (रूप) लिङ्गेन पृथक् तत् तदर्थं विनियोग-सिद्धिरिति वाक्यस्य निराकाङ्क्षतया विनियोगासाधकत्वात्।

विधिबोधिनी

केवलवाक्येनाविरोधमुपपादयति तथाहीत्यादिना। पदान्तरैकवाक्यतेति। आर्थवादिक-पदानां विधिपदैः सहैकवाक्यतावत् पदान्तरेण सह पदस्यैकवाक्यत्वं ज्ञेयम्। विलम्बेनेति। लैङ्गिकार्थप्रतीत्यपेक्षया विलम्बेनेत्यर्थः। केवलश्रुतिलभ्यस्य पदान्तरैकवाक्यतां विना द्वितीया-श्रुतिमात्रलभ्यार्थस्येत्यर्थः। तथाच भिन्नविषयतयाऽविरोधादेव न लिङ्गार्थबाध इत्यर्थः। लिङ्गार्थबाधापत्तेरिति वाक्येन लिङ्गापेक्षया शीघ्रबोधापत्तेरित्यर्थः। तथा च सति पारदौर्बल्य-सूत्रविरोधः। शाब्दबोधादिति। तथाविधानुमित्यपेक्षया प्रथमतः श्रौतमुख्यार्थशाब्दबोधा-

दित्यर्थः। प्रकृते इति। ऐन्द्रीवाक्यस्थल इत्यर्थः। निराकाङ्क्षतेति। गार्हपत्यवाक्येन शीघ्रप्रवृत्युत्तरं मन्त्रजन्यशाब्दबोधे आकाङ्क्षैव नास्तीतिभावः। वाक्यलिङ्गस्येति वाक्यलिङ्गयोरित्यर्थः। उदाहरति स्योनं ते इति। सम्पूर्णो मन्त्रो यथा "स्योनं ते सदनं कृणोमि घृतस्य धारया सुषेवं कल्पयामि। तस्मिन् सीदामृते व्रीहीणां मेध सुमनस्य मान"। अस्यार्थः—हे पुरोडाश! ते तव स्योनमुत्तमं सदनं स्थानं कृणोमि करोमि; तच्च स्थानं घृतस्य धारया सुषेवं सुखावस्थान (सुखशयन) योग्यं कल्पयामि। हे व्रीहीणां मेध! सारभूत! (पुरडाश!) सुमनस्यमान समाहितमनास्तस्मिन् सुखकत्वादमृते पतनादिरहिते स्थाने सीद उपविश प्रतितिष्ठ प्रतिष्ठितो (स्थिरो) भव इति। अस्य मन्त्रस्य स्योनमित्यादि कल्पयामीत्यन्तेन सदनार्थप्रकाशकादुत्तरार्धप्रतीकेन च सादनार्थप्रकाशकत्वाद् यथाक्रमं पुरोडाशस्थानकरणे पुरोडाशस्थापनकरणे च विनियोज्यमित्यर्थाल् लभ्यते। तत्र लिङ्गाद्वाक्यस्य बलवत्त्वे मन्त्रस्य सदनसादनोभयकर्मणि विनियोज्यत्वं तस्मिन्नित्यनेन पूर्वपरामर्शितत्पदेन पूर्वोत्तरकर्मणोः साकाङ्क्षत्वेन संग्रहसम्भवात्। वाक्यलिङ्गयोस्तुल्यबलत्वेऽपि सामग्र्येण तत्तदंशं विभज्य वा तस्योभयकर्मणि विनियोज्यत्वं तुल्यबलत्वात्। वाक्याल्लिङ्गस्य बलवत्त्वे मन्त्रांशं विभज्य कर्मद्वये खण्डशः विनियोज्यत्वं तत्तल्लिङ्गप्रकाशकत्वात्तत्तदंशस्य। इत्यादिविचिकित्सासु पारदौर्बल्यसूत्रार्थः ग्रहणीयः। लिङ्गाद् दुर्बलं वाक्यम्। वाक्याल्लिङ्गं प्रकल्प्य श्रुतिः कल्प्यते इति व्यवहिता श्रुतिकल्पना। लिङ्गाच्च साक्षादव्यवहिता श्रुतिकल्पनेतिवाक्यस्य दौर्बल्यम्। अस्य चोत्तरार्द्धस्य सादानार्थप्रकाशकत्वात् सादने सामर्थ्यकल्पनां विना न तत्र विनियोक्तुं शक्यते। तथा पूर्वार्धस्य सदनार्थप्रकाशकत्वात् सादने सामर्थ्यकल्पनां विना न तत्र विनियोक्तुं शक्यते। इत्युभयतो वाकाल्लिङ्गाच्च श्रुतिकल्पनस्य कर्तव्यत्वे प्रागुक्तव्यवहिताव्यवहितभेदेनाव्यवहितश्रुतिकल्पकस्य लिङ्गस्य बलवत्त्वमिति। एवञ्च वाक्यभेदेऽपि न दोषः। अर्थभेदाद्वाक्यभेदस्य स्वीकृतत्वात्। अतश्च मन्त्रस्य पूर्वार्द्धं पुरोडाशस्य स्थानकरणे परार्द्धं च तस्य प्रतिष्ठापने विनियोज्यमिति निष्कर्षः। अतएव 'बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा' मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षयेति भट्टकुमारिलोक्तिः सङ्गच्छते। तथाच परस्परसाकाङ्क्षत्वरूपैकवाक्यरूग्रहात् पूर्वमेव लिङ्गेन पृथक् पृथक तत्तदर्थे विनियोगसिद्धेस्तदानीं वाक्यस्य साकाङ्क्षत्वविरहान वाक्याच्छुति कल्पनेति भावः। मीमांसापरिभाषाकृदपि "तत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानाद्द वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति। लिङ्गेन तु भिन्नमन्त्रत्वं भाति। आद्यस्य सदनप्रकाशकत्वात तस्मिन् सीदेत्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद्द वाक्यं वाधित्वा लिङ्गेन। स्योनं ते इत्यस्य सदनाङ्गत्वं, तस्मिन् सीदेत्यस्य सादनाङ्गत्वमिति निर्णय

गादाधरी

मन्त्रलिङ्गवत् कथितसूत्रनिर्दिष्टवाक्यप्रकरणस्थानसमाख्यानामप्यनुमानोत्थापकतयैव विनियोगसाधकत्वं बोध्यम्। सूत्रे लिङ्गपदं मन्त्रलिङ्गपरमेव। लिङ्गसामान्यपरत्वे वाक्यादिचतुष्कस्यापि तदन्तर्भावेणैव पृथगुपादानासङ्गतेः। तत्र वाक्यं पदानामेकवाक्यता पूर्वोक्ता, प्रकरणं यज्ञोपयोगस्तस्य शेषिणः कथम्भावरूपकाङ्क्षयाभिधानम्।

स्थानं तत्सान्निध्यं, समाख्या अवयवशक्त्या उपयोगार्थसमर्थनम्। तथाचोक्तं "श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहितानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्येति"। लिङ्गादीनां स्मृत्याचारवच्छ्रुतिकल्पकत्वेऽपि बलवत्प्रत्यक्षसिद्धश्रुत्यादिविरोधस्थले न तद्विरुद्धार्थकश्रुतिकल्पनसम्भवः।

विधिबोधिनी

इत्याह। अनुमानोत्थापकतयेति। वाक्यादिसमाख्यान्तां सर्वेषामेवानुमानपरम्परया श्रुतिकल्पनेति तेषां पारम्पर्य्यस्य श्रुतिकल्पनान्तरभेदात् दौर्बल्यमित्यवधेयम्। श्रुतिकल्पनां विना न विनियोगसम्भव इति भावः। लिङ्गसामान्यपरत्व इति वाक्यादिचतुष्कस्याप्यर्थप्रकाशनसामर्थ्यसत्त्वादिति भावः। पदान्तरसमभिव्याहारो वाक्यम्। समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतोऽङ्गाङ्गिनोः सहोच्चारणम्। तदिदं वाक्यं प्रकरणाद् बलीयः, आकाङ्क्षारूपं प्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणम्। एवं च यावत् प्रकरणं वाक्यं कल्पयित्वा विनियोजकं भवति तावद् वाक्यं लिङ्गश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं वलीयः। उभयाकाङ्क्षा प्रकरणम् (प्रक्रिया)। अङ्गप्रधानोभयगतपरम्पराकाङ्क्षारूपेत्यर्थः। दर्शपौर्णमासप्रकरणे प्रयाजादीं प्रयोजनाकाङ्क्षायां दर्शपौर्णमासयोश्च कथम्भावाकाङ्क्षायां परपस्राकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वाल्लक्षणसङ्गतिः। कथम्भावाकाङ्क्षापूरकत्वरूपेतिकर्तव्यतारूपमिदं प्रकरणं क्रियाया एव विनियोजकं न द्रव्यगुणयोः। तयोस्तु क्रियायोगाद्विनियोजकम। किं केन कथमित्यार्थी-

भावनाया अंशत्रयेण स्वर्गं यागेन भावयेदित्यनन्तं कथमिति । यमः प्रकारवाचित्वेन करणगत-प्रकाराकाङ्क्षा हि कथम्भावाकाङ्क्षा विशेषस्तु मीमांसादर्शनेऽनुसन्धेयः ।

स्थानं देशसामान्यं सान्निध्यम् । स्थानं क्रमश्चेत्यनर्थान्तरम् । तच्च पाठसादेश्या-नुष्ठानसादेश्यभेदाद् द्विविधं ज्ञेयम् । यथा सान्नाय्यपात्रसन्निधौ शुन्धध्वमिति मन्त्रस्य पाठात् तस्य च शुन्धशुद्धौ "इत्यस्मान्निष्पन्नत्वेन शोधकत्वावगमासत् न्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्ग-त्वमिति । सान्नाय्यं दधिपयसी । योगबलं समाख्येति समाख्या यौगिकः शब्दः समाख्या संज्ञेत्यनर्थान्तरम् । सापि वैदिकीलौकिकीभेदेन द्विविधा । तत्र होतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिक्या समाख्यया । अध्वर्य्योस्तत्तत्पदार्थाङ्गत्वमिति लौकिक्या आध्वर्य्यव-मिति समाख्ययेति संक्षेपः ।

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ (२।१२) इतिमानवीयधर्मशास्त्राच्छ्रुतेः प्रत्यक्षप्रमाणतया स्मृत्याचारयोश्च वेदमूलकतया प्रामाण्य-मभिहितम् । तथाच मीमांसापरिभाषा—तयोश्च धर्माधर्मयो र्वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम् । इतरौ तु वेदमूलकतया प्रमाणमिति । तन्त्रवार्त्तिके च "आचारात् तु स्मृतिं ज्ञात्वा श्रुतिर्विज्ञायते ततः । तेन द्वयन्तरितं तस्य प्रामाण्यं विप्रकृष्यते" ॥ अन्यच्च 'शिष्टाचारात् स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् । तयोर्ह्यन्तरितं तस्य प्रामाण्यं विप्रकृष्यते ।" इत्यादिनयाल्लिङ्गादीनामपि श्रुतिकल्पकत्वेऽपि बलवत्प्रत्यक्षश्रुत्यादिविरोधस्थले न लिङ्गेन श्रुतिस्मृतिसदाचारविरुद्धश्रुतिकल्पनसम्भव इति तात्पर्य्यम् । तद्विरोधेनेति । श्रुत्यादि-विरोधेनेत्यर्थः । तद्विरुद्धार्थइति । श्रुत्यादिविरुद्धार्थे इत्यर्थः । स्मृतेरिव । श्रुति-स्मृतिविरोधेतु श्रुतिरेव गरीयसीति न्यायादिति प्रत्यक्षश्रुतिविरुद्धेः स्मृतेरप्रवृत्तिवदिति भावः ।

न च मनुवचने "स्वस्य च प्रियमात्मनः" इति धर्मलक्षणदर्शनाद् यथेच्छं प्रीतिजनक-निषिद्धकर्मण्यपि प्रवृत्त्यापत्तिरिति वाच्यम् । "वैकल्पिके आत्मतुष्टिः प्रमाणमिति गर्गवचना-च्छ्रुतिसदाचाराविरोधिविकल्पविहितविषये यत्किञ्चित् स्वस्य रुच्यनुसारेण समाचरणव्यवस्था-पनात् । एतदेकवाक्यतया मनुवचने आत्मनस्तुष्टिरेव चेत्यभिहितम् ।

विनियोगविधिं विभजते । अपूर्वविधीत्यादि । यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिरिति फलितार्थः । सोऽपि कर्मविधि–गुणविधि-विनियोगविधि-प्रयोगविधिभेदाच्चतुर्विधः । तत्राग्निहोत्रं जुहोतीत्यादौ यागरूपे कर्मणि कृतिसाध्यताया

इष्टसाधनताया भावनाया वा मतभेदेन बोधनात् कर्मविधित्वम्। द्रव्यदेवतादिविधायकविधिर्गुण-विधिः। यथा दध्ना जुहोतीत्यादिवाक्यम्। प्राप्तस्याग्निहोत्रस्यानुवादेनाप्राप्तगुणरूपदध्यादि-द्रव्यस्य विधानात्। विनियोजनाद् विनियोगविधिः। यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यादि। अत्र ऐन्द्र्या ऋचा गार्हपत्योपस्थाने विनियोजनाद् विनियोगविधिः। एवं कृत्वा एवं कुर्य्यादित्यादिप्रयोगज्ञापको विधिः प्रयोगविधिः। यथा अधीत्य स्नायादित्यादि। अयं च विशिष्टविधिरिति वाचस्पतिमिश्राः।

द्वयोः समुच्चित्य प्राप्ताावितरनिवृत्तिफलको विधिः परिसंख्याविधिः। स च स्वविषयादन्यत्र प्रवृत्रिविरोधी। स्फूटीभविष्यति चोपरिष्टात्। विपरिणमय्येति लिङ्गविपरिणामः। लिङ्गं प्रकृत्यर्थान्वयोपयोगि विधायेत्यर्थः। भिन्नविभक्तिकत्वादिति। भिन्नविभक्तिकयोर्न विशेष्य-विशेषणभाव इत्यर्थः। अतो द्वितीयान्ततेति क्रियाविशेषणे द्वितीयाया अनुशासनादिति भावः। रागत आसक्तित इत्यर्थः। न कलञ्जं भुञ्जीतेत्यादौ भोजनस्य प्राप्ती रागत एवं व्रीहीन प्रोक्षतीत्येदं विध्यभावे दर्शपौर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति। एतद्विधिसद्भाव एव तत्सम्बन्धिषु व्रीहिषु प्रोक्षणं प्राप्नोतयेवेत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिरेव। अवहितैरप्यप्रोक्षितैर्व्रीहिभिर्यागसम्पादनेऽपूर्वोत्पत्त्यसम्भवात्। तत्र संस्कारानुत्पत्तेरिति तातपर्य्यम्। प्रोक्षणेन व्रीहिगतं किञ्चिदपूर्वं जन्यत इति तत्सिद्धान्तात्। प्रोक्षिता एव व्रीहयोऽवघाताय कल्प्यन्त इति शास्त्रादिति भावः।

यो विधिः पक्षेऽप्राप्तमर्थं नियमयति स नियमविधिरिति मीमांसापरिभाषा। यथा व्रीहीन-वहन्तीति। एतद्विध्यभावे दर्शपौर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगि-तण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्य्यायावहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्त्यभावात् कार्य्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात्। सति चास्मिन् विधौ वैतुष्यमवहनेनैव कार्य्यमिति नियमे सति नखविदलनं सर्वात्मना निवर्तत इति नियम-विधिरयम्। वैतुष्यस्य नखविदलनेनापि सम्भवे सत्यपि "अवघातेनैव वैतुष्यकरणे किञ्चिद दृष्टं जायते" इतिनियमादृष्टाङ्गीकारान्नावहनननियमवैयर्थ्यम्। नियमेन दृष्टकार्य्यलाभेऽप्य-दृष्टस्योत्पत्तेः। तच्चादृष्टापरपर्य्यायमपूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते। तथाच नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यते प्रवृत्तेरनियमे सतीति।

तद्विरोधेन तद्विरुद्धार्थे लिङ्गादेरप्रवृत्तेः। प्रत्यक्षश्रुतिविरुद्धे यथाश्रुतार्थे स्मृतेरिवेति ध्येयम्। एतेषामुदाहरणादीन्यन्यत्रानुसन्धेयानि। विनियोग-विधिरपि अपूर्वविधिनियमविधिपरिसंख्याविधिभेदात् त्रिधा। यं विधिं विना कथमपि तदर्थगोचरप्रवृत्तिर्नोत्पद्यतेऽसावपूर्वविधिः। स्वविषयादन्यत्र प्रवृत्तिविरोधी विधिः परिसंख्याविधिः। तदुक्तं "विधिरत्यन्तमप्राप्तौ परि-संख्येति गीयते॥" अत्यन्तमप्राप्ताविति सत्यामिति शेषः, सतीत्यग्रिममेव वा विपरिणमय्यात्रापि योज्यम्। अत्यन्तपदञ्च नाप्राप्तिविशेषणपरं भिन्न-विभक्तिकत्वात् किन्तु सत्यामित्यत्र योऽसधातुस्तदर्थभवनरूपक्रियाविशेषण-परम्। अतो द्वितीयानुता, अप्राप्तिभवनविशेषणं फलतोऽप्राप्तिविशेषण-मेव। अत्यन्ताऽप्राप्तिर्विधिं विना तद्विषये रागतः शास्त्रतश्च कदाचिदपि प्रवृत्त्यसम्भवः। सतु प्रवर्तकोऽपूर्वविधिरित्यर्थः। एवम्भूतेश्च विधिर्व्रीहीन् प्रोक्षतीत्यादिः। व्रीहिसाध्यपुरोडाशद्रव्यकयागजन्यापूर्वाद्यर्थिनां व्रीहिप्रोक्षणादौ प्रवर्तको विधिः अप्रोक्षितव्रीहिभिरपि अवत्तैर्यागनिर्वाहकपुरोडाशसम्भवात्। प्रोक्षणे व्रीहिसंस्कारद्वारा यागोपकारकत्वस्य तेन विधिना अबोधने कथमपि तत्र प्रवृत्तिर्न स्यादिति प्रकारान्तरासम्भवात्, प्रवृत्तिविषयताकप्रोक्षणप्रवर्तकतया तत्रोक्तलक्षणसमन्वयः। नियमः पाक्षिके सतीति विधिं विना प्रवृत्तेः पाक्षिकत्वे सतीत्यर्थः, प्रवृत्तेरनियमे सतीति यावत्। तथाच तद्गोचरप्रवृत्तिनियमनिर्वाहको विधिस्तन्नियमविधिरिति फलितम्। तादृशश्चावघातादिविधिः। व्रीहीनवहन्तीति विधिं विना पुरोडाशनिष्पादकव्रीहिवैतुष्यद्वारा यागोपकारकेऽवघाते इव तत्परी-हारेण नखदलनादावपि प्रवृत्तिप्रसक्त्या अवघाते प्रवृत्तिनियमो न स्यादिति तादृश-विधेः प्रवृत्तिनियामकनिर्वाहकत्वम्। यागोपकारकव्रीहिवैतुष्येऽवघाताधीनत्व-नियमस्तादृशविधितो यद्यपि दुर्लभो नियमस्यापदार्थत्वादेकवाक्यार्थत्वाच्च, तथापि तादृशविधितो व्रीह्यवघातत्वेन विनियोगसाधनतावगमात् यागजन्य-परमापूर्वस्य तदवघातरूपकारणं विनाऽनिष्पत्तिप्रतिसन्धानेन तत्र नियमतः प्रवृत्तिनिर्वाहः। तत्र चान्यत्र चेति। यत्रोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि

गादाधरी

तत्सम्बन्धस्य तस्मिन् वा तदन्यसम्बन्धस्य प्रवृत्तितः प्रसक्तेरित्यर्थः। तथाच तादृशसम्बन्धप्रसञ्जकप्रवृत्तिविरोधी विधिः परिसंख्याविधिरित्यर्थः। तत्र प्रथमः "इमामगृभ्णन् रसनामृतस्य" इत्यश्वाभिधानीमादत्ते इत्यत्र इमामित्यादिमन्त्रस्य रसनामात्रग्रहणप्रकाशकतया अश्वरसनादान इव गर्दभरसनाया आदानेऽपि मन्त्रस्य विनियोगो मन्त्रलिङ्गाल्लभ्यते, तथाच तदादानकालेऽपि तन्मन्त्रपाठप्रवृत्त्या तत्रापि तन्मन्त्रसम्बन्धः स्यादेव चेदेतद्विधिर्न स्यात्; एतस्माच्च विधितः प्रथममश्वरसनाग्रहणे एतन्मन्त्रविनियोगलाभे निराकाङ्क्षतया गर्दभरसनाग्रहणे तद्विनियोगालाभ इति वैयर्थ्येन न तदाचरणमिति एतद्विधेर्विधस्येयतरोद्देश्ये सम्बन्धप्रसञ्जकप्रवृत्तिविरोधिता। द्वितीयश्च गृहमेधीये आघाराज्यभागौ जुहोतीति अत्रातिदेशेन प्रकृतीभूतदर्शाङ्गस्य प्रयाजादेराघाराज्यभागहोमस्य गृहमेधीयाग्नावुद्देश्ये सम्बन्धलाभात् ईदृशविध्यसत्त्वे प्रयाजादिहोमस्यापि तत्रानुष्ठानं स्यात्, विधिसत्त्वे चेतिकर्तव्यतान्तर्गतस्याज्यभागहोमस्य विधानेनेतिकर्तव्यतान्तर्भूतहोमसमुदयाकाङ्क्षानुत्पत्त्या तादृशाकाङ्क्षाया एव च प्रयाजादिप्रापकातिदेशप्रवर्तकतया तन्निवृत्त्यातिदेशाप्रवृत्तौ तत्प्रापणीयप्रयाजादिनिवृत्तिः।

विधिबोधिनी

वैतुष्यीकरणस्यावहननद्वारा नखविदलनद्वारा च सम्भवेनावहननेनैव वैतुष्यीकरणमनेन व्रीहीनवहन्तीतिविधिना नियमत इति भावः। कारिकाक्रमप्राप्तं परिसंख्याविधिं निरूपयति यत्रोद्देश्येति। इदमत्रावधेयम्। तत्र चान्यत्र चेति सप्तमीद्वयेन सह प्राप्ते इत्यस्य वैयधिकरण्येन सामानाधिकरण्येन च द्वेधाऽन्वयः सम्भवति। तत्र वैयधिकरण्येनान्वये तस्मिन्नन्यस्मिंश्च शेषिणि एकः शेषो यदि प्राप्नुयात्, तत्रान्यतरशेषिणः परिसंख्या शेषिपरिसंख्याभिधाना। यथा "इमामगृभ्णन् रसनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र "इमामगृभ्णन् रसनामिति लिङ्गादेव रशनाप्रकाशनरूपात् मन्त्रस्य सन्निहितायामश्वरशनायामिव गर्दभरशनायामपि प्राप्तौ सत्यां विधिरत्यन्ताप्राप्तमर्थं प्रापयति किन्तु गर्दभरशनातो मन्त्रस्य निवृत्तिं बोधयतीत्यन्यतरशेषिणः परिसंख्या। सामानाधिकरण्येनाऽन्वये च स चान्यश्च शेष एकस्मिन् शेषिणि

विधिबोधिनी

प्राप्नुयाच्चेदन्यतरस्य शेषस्य परिसंख्या शेषपरिसंख्येति। यथा गृहमेधीयाधिकरणे पञ्चमे पक्षे "आज्यभागौ यजतीत्याज्यभागयोस्तदितराङ्गानां च युगपदेकस्मिन् गृहमेधीये प्राप्तावाज्यभागातिरिक्ताङ्गानां परिसंख्या। प्रतिपादितञ्चैतत् "प्रतिषेधः स्यादितिचेत्

गादाधरी

अथ व्रीहीनवहन्तीति नियमविधिदर्शितपरिसंख्याविध्योः को विशेषः? नियमविधेरपि परिसंख्यावदितरनिवृत्तिफलकत्वात्। नियमविध्यसत्त्वे पुरोडाशद्वारा यागोपकारकवैतुष्यार्थिनोऽवघातेतरतदुपाये प्रवृत्तिप्रसक्तेः। यदिचावघातनियविधेरवघातप्रवृत्तिनियमफलकत्वं परिसंख्यातो विशेषः इमामगृभ्णन् रसनामित्यादिपरिसंख्याया अश्वरसनादाने मन्त्रपाठनिवृत्तिनियमस्य मन्त्रलिङ्गेन मन्त्रस्या साधारण्येनोपकारकताबोधनादेव निर्वाहात् तस्याः प्रवृत्तिनियमानुपपादकत्वादिति विभाव्यते, तदास्तु परिसंख्यायां नियमानन्तर्भावः, नियमस्तु परिसंख्यायामन्तर्भवतु परिसंख्याफलस्य तत्साधारण्यादिति चेन्न। नियमस्थले इतरनिवृत्तेरर्थतः सम्भवेऽपि तत्र तत्तात्पर्य्यानभ्युपगमात् नियमप्रवृत्तावेव तत्तात्पर्य्याभ्युपगमात्। न चोपायान्तरनिवृत्त्यापि नियमतोऽवघातप्रवृत्त्युपपत्ते निवृत्तावेव तत्तात्पर्य्यं, न तु नियतप्रवृत्तावित्येव किं नोपेयत इति वाच्यम्। अवघातविधिना अवघातस्यासाधारण्येन यागोपकारकताबोधनेऽपि अवघातमात्रेण वैतुष्यानिर्वाहप्रतिसन्धाने अन्योपायसम्बलनेनाप्यवघातप्रवृत्तिसम्भवादवघातविधेरितरनिवर्त्तकत्वायोगेन तस्येतरनिवृत्तौ तात्पर्य्यासम्भवात्।

अथ तथासत्युपायान्तरसम्बलितावघाताधीनमपि वैतुष्यं शास्त्रार्थ इति चेदिष्यत एवैतत्। अतएवेतरसम्बलनस्याशास्त्रार्थत्वे नियमो नोपेयते। यथा पञ्च पञ्च नखान् भुञ्जीतेत्यादौ, तत्र पञ्चनखभक्षणे शशकादिपञ्चकरूपकर्मनियमे मिलितशशकमार्जारादिमांसभक्षणे नियमानुल्लङ्घनान्नियमेनेतरनिवृत्त्यसम्भवात्। अतएव तत्र दोषत्रयदुष्टापि अगत्या परिसंख्या

उपेयते। अतएवेतरनिवृत्त्युपपत्तेः, न तु नियमः, तथासति मिलितमांसस्याभक्ष्यतानुपपत्तेः, न चैवमपि तत्र नियम एव किं नोपेयते। मिलितमांसं भक्ष्यमेवास्तु मार्जारमांसादिभक्षणप्रायश्चित्तविधीनां शशकादिमांसासम्बलितमांसभक्षणपरतयैवाविरोधादिति कथं दुष्टायाः परिसंख्याया आदर इतिवाच्यम्। शिष्टाचारविरोधाद् बहुतरप्रायश्चित्तविधिषु सङ्कोचेन गौरवप्रसङ्गाच्च। "श्वाविधं शल्लकीं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥" इति मनुवचने निर्धारणसप्तमीबलात् पञ्चनखपरिसंख्यानपरमेवैतदिति शूलपाणिः। यद्यपि भक्ष्यपञ्चनखे शशकाद्यभेदनियमेन इतरपञ्चनखस्याभक्ष्यता लभ्यते भक्ष्यपञ्चनखत्वे शशकाद्यभेदव्याप्यतालाभे शशकादिभिन्नपञ्चनखे गृहीतव्यापकताकशशकाद्यभेदाभावेन भक्ष्यपञ्चनखत्वाभावसिद्धौ भक्ष्यत्वाभावमादायैव पर्य्यवसानादिति मन्यते तदाऽस्तु तत्र परिसंख्याकार्य्यकरी नियम एव, यद्यपदार्थस्य व्याप्य-व्यापकभावस्य संसर्गमर्य्यादया भानसम्भवः। वस्तुतस्तु उद्देश्यतावच्छेदकविधेयसम्बन्धयोरेव व्याप्यव्यापकभावस्य संसर्गमर्य्यादया भानं व्युत्पत्तिसिद्धं तथाच भक्ष्याः पञ्चनखाः पञ्च इत्यादिवाक्यस्थले भक्ष्यत्वविशेषितपञ्चनखानां शशकाद्यभेदरूपविधेयोद्देश्यतया अभिमतव्याप्यव्यापकभावलाभेऽपि पञ्च पञ्चनखान् भुञ्जीतेत्यादिवाक्यात् तल्लाभसम्भवः, पञ्चनखकर्मताविशेषितभक्षणबोधकतादृशवाक्याद् भक्षणकर्मताविशेषितपञ्चनखस्यालाभेन तादृशस्योद्देश्यत्वासम्भवादन्तरेण परिसंख्यानं नेतरनिवृत्तिः सम्भवति।

ननु इमामगृभ्णन् रसनामित्यादिपरिसंख्याविधिस्थले पूर्वदर्शितरीत्या इतरनिवृत्तिः सम्भवति, पञ्च पञ्चनखानित्यादौ च परिसंख्यायां कथमितरपञ्चनखाभक्ष्यत्वलाभ इति चेत्। लक्षणया पञ्चपदस्य पञ्चातिरिक्ततत्परतया भक्ष्यार्थकधातोश्च बलवदनिष्टानुबन्धिभोजनार्थकतया तल्लाभसम्भवः। अथवा धातुर्न भोजनविशेषपरोऽपितु विरोधिलक्षणया भोजनाभावपर एव, तत्र च विधिप्रत्ययेन नरकनिवृत्तिरूपेष्टसाधनत्वं प्रत्याय्यते। अतो विध्यर्थ-

बोधकतया लिङादेः साधुत्वनिर्वाहः। अतएव च स्वार्थहान्यादिर्दोष इति यत्र नियमेनोपपत्तिस्तत्र न तदादरः। अतएव याजनाध्यापनप्रतिग्रहै-र्ब्राह्मणो धनमर्जयेदित्यादौ ब्राह्मणधनार्जने याजनादिकरणकत्वनियम एव सर्वसिद्धः। तावतैव वाणिज्यादिना तदर्जननिवृत्तिसिद्धिः। तथाहि बलवद-निष्ठाननुबन्धित्वरूपविध्यर्थविशेषितधनार्जनरूपोद्देश्ये याजनादिकरणकत्वस्य विधाने तस्य तत्सम्बन्धस्य वा तादृशोद्देश्यतावच्छेदके व्याप्यत्वलाभात् तदभावेन वाणिज्यादिकरणकार्जनेऽनिष्टानुबन्ध्यर्जनत्वस्य व्याप्यस्याभावे सिध्यति तत्रानिष्टानुबन्धित्वस्यैव सिद्धिपर्य्यवसानात्। न हि तत्र शशक-मार्जारादि(क)कर्मकैकभक्षणसम्भवात् (सम्भववत्) वाणिज्ययाजनादि-करणककार्जनसम्भवः, येन करणनियमपक्षे तत्रानिषिद्धयाजनादिकरणकत्वा-भावविरहेण दर्शितरीत्या निषेधपर्य्यवसानेन परिसंख्याद्रियेत। अतएव शब्दनिर्णये विधिवादे वाचस्पतिमिश्रैर्नियमः पाक्षिके सतीत्यादिकम्। कारकाणां यत्र पाक्षिकता समुच्चयासम्भवद्रूपा तत्र नियम एवाद्रियते, तत एवेतरनियमनिवृत्तिसम्भवात्, यत्र तत्समुच्चयसम्भवस्तत्रागत्या कारकान्तर-निवृत्तये परिसंख्येत्येव व्याखेयम्। इदन्तु चिन्त्यते ब्राह्मणो धनमर्जयेदित्यत्र ब्राह्मणो विशेष्यः, न तु धनार्जने विशेषणम्, एवञ्च ब्राह्मणकर्तृकत्वविशेषित-धनार्जनस्योद्देश्यत्वासम्भवात् तदविशेषितानिष्टाननुबन्धिधनार्जनस्यैवोद्दे-श्यत्वमुपेयम्। तदव्यापकता च न याजनादिकरणकत्वस्य सम्भवति। वैश्यादिकर्तृकवाणिज्यादिकरणकानिषिद्धधनार्जनसाधारण्याभावात्। एवं बलवदनिष्टाननुबन्धित्वादिविध्यर्थस्याख्यातार्थकृतावन्वयमतेऽनिष्टाननुबन्धि-कृतिविषयार्जनमेव याजनादिकरणोद्देश्यमुपगन्तव्यं, तच्च न सम्भवति। तादृशकृतेः कर्त्राख्यातस्थले धात्वर्थविशेष्यतयैव भानात्। एवं याजनत्वस्य (याजनादिकरणकत्वस्य) प्रत्येकमेव विधेयतया प्रत्येकं नानिषिद्ध-ब्राह्मणधनार्जनत्वव्यापकता, परस्परं व्यभिचारात्। अन्यतमकरण-कत्वत्वेन व्यापकतासत्त्वेऽपि नोक्तवाक्यात् तल्लाभसम्भवः, तादृशरूपस्य

विधेयतानवच्छेदकत्वात्। विधेयतावच्छेदकरूपेणैव च विधेये व्यापकताबोधस्य व्युत्पत्तिसिद्धत्वात्; अन्यथातिप्रसङ्गात्। याजनादित्रित्वस्य त्रितयसाधारणत्वेन तत्तत्करणकत्वत्वेन व्यापकत्वसम्भवात्। अन्यतमत्वाघटितेन तेन रूपेण व्यापकता विवक्षणीयेत्यपि न, त्रित्वस्य व्यासज्यवृत्तितया तत्पर्य्याप्त्यधिकरणकरणकत्वस्य प्रत्येकमसत्त्वेनाप्रसिद्धया व्यापकत्वासम्भवात्। पर्य्याप्तिसम्बन्धेनैव च बहुवचनस्य त्रित्वाद्यन्वयबोधकताव्युत्पत्तेः, पर्य्याप्त्यघटिततदाश्रयकरण (कत्व) त्वस्य विधेयतावच्छेदकतया भानासम्भवात्। एवं याजनादित्रितयविशेषितत्रित्वस्य (न) बहुवचनेन प्रकृत्यर्थविशेष्यतया (बोधनसम्भवः) बोधो न सम्भवति। याजनत्वाद्यवच्छिन्नविशेषणतया बहुवचनार्थत्रित्वान्वयात्। तथाच त्रित्ववद् याजनत्वादिकमेव विधेयतावच्छेदकघटकं, तादृशञ्च प्रत्येकवृत्तितया न व्यापकतावच्छेदकमिति न प्रतीकारः। यदि च ब्राह्मणो धनमर्जयेदित्यतो ब्राह्मणकर्त्तृकानिषिद्धधनार्जनत्वादेरुद्देश्यतावच्छेदकतया अभानेऽपि तद्रूपनिरूपितव्यापकता सम्बन्धमर्य्यादया भासते इत्युपेयते, उपेयते च व्युत्पत्तिवैचित्र्याद् बहुत्वस्य पर्य्याप्तिं परित्यज्याश्रयतामात्रं सम्बन्धः, तदा पञ्च पञ्चनखान् भुञ्जीतेत्यादावपि विपरीतविशेष्यविशेषणभावलभ्यस्य भक्ष्यपञ्चनखत्वस्य वाक्यादुद्देश्यतावच्छेदकतया अभानेऽप्येतादृशसमभिव्याहारस्थले तद्रूपनिरूपितायाः शशकादिपञ्चकत्वाश्रयाभेदत्वावच्छिन्नव्यापकतायाः संसर्गमर्य्यादया भानसम्भवेनेतरनिवृत्तिसिद्धेस्तत्रापि परिसंख्या न स्यात्। इदं तु तत्त्वम्। उद्देश्यतावच्छेदक–विधेययोर्व्याप्यव्यापकभावबोधनेनान्यथा वा यत्रेतरनिवृत्तौ विश्राम्यन्ति तदैव परिसंख्यावाक्यम्। स च क्वचित् प्रवर्तकतया परिसंख्याविधिः इमामगृभ्णन्नित्यादिः, क्वचिन्निषेधवन्निवृत्तिमात्रपरतया अविधिरूपं परिसंख्यावाक्यं पञ्च पञ्चनखानित्यादि, याजनाध्यापनेत्यादिकमपि परिसंख्यैवेति।

अथैवं सति परिसंख्यास्थले स्वार्थहान्यादिदोषत्रयादस्यासङ्गतिः स्वार्थपरित्यागमन्तरेणापि परिसंख्याविधिस्थले पञ्चनखादिपरिसंख्यास्थलेऽपि

गादाधरी

इतरनिवृत्तिसिद्धेर्दर्शितत्वात्। एवमृतौ भार्य्यामुपेयादित्यादिनियमो न तु परिसंख्या दोषत्रयप्रासादिति सर्वसिद्धसिद्धान्तोऽपि व्याहन्येत। स्वार्थहान्यादिमन्तरेणैवानिष्टाननुबन्धिभार्य्याभिगमने ऋतुकालव्याप्तिबोधात् परिसंख्याफलस्येतरकाले भार्य्याभिगमननिवृत्तिनिर्वाहान्नियमानावश्यकत्वात्।

विधिबोधिनी

(जैः सूः १०।७।२८) इति सूत्रव्याख्यानावसरे। तथाचाज्यभागशब्दस्य धर्मलक्षणार्थत्वापत्तेः कर्मान्तरविध्ययोगादतिदेशेनाज्यभागयोस्तदितरेषु च प्रयाजादिषु प्राप्तेषु आज्यभागपुनःश्रवणं तदितरप्रयाजादिपरिसंख्येत्यर्थः। एवञ्चैकस्मिन्नङ्गे प्रधानद्वयसम्बन्धे नियतप्राप्ते, एकस्मिन् प्रधाने चाङ्गद्वयसम्न्बन्धे नियतप्राप्ते सत्यन्यतरनिवृत्तिफलको विधिः परिसंख्याविधिरिति फलितम्। ग्रन्थार्थस्तु यत्नोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि तत्सम्बन्धस्य तस्मिन् वा तदन्यसम्बन्धस्य प्रवृत्तितः प्रसक्तावित्यर्थः। अत्रत्य लिङा प्रत्यवायहेतुत्वं प्रत्याय्यते। तेन शशादिपञ्चभिन्नानां पञ्चनखानां भोजनं प्रत्यवायहेतुरित्येव तत्र वाक्यार्थः। तत्सम्बन्धस्येत्यर्थः। प्रसञ्जकत्वं चापादकत्वम्। आहार्य्यारोप आरोपो वेत्यर्थः। प्रसक्तिरापत्तिरित्यर्थः। इदं वाक्यं पञ्चानां पञ्चनखानां न भक्षणविधायकम्। तस्य रागतः प्राप्तत्वात्। नापि तेषां भक्षणनियमपरम्। तेषां च तदितरपञ्चनखानां च भक्षणस्य युगपदपि रागतः प्राप्ततया पक्षेऽप्राप्त्यभावात्। किन्तु लक्षणया पञ्चेतरपञ्चनखानां श्वाविधादीनां भक्षणनिवृत्तिपरमिति परिसंख्या। प्रयाजादिनिवृत्तिरिति। प्रत्यभिज्ञाबलादिष्टियागीयाज्यभागद्वयेन सहास्यैक्येऽपि चाज्यभागद्वयातिरिक्तप्रयाजाद्यङ्गानां निवृत्तिरित्यर्थः। प्रपञ्चस्तु जैमिनिसूत्रदशमाध्याये सप्तमे द्रष्टव्यः।

नियमविधिपरिसंख्याविध्योर्भेदं विचारेण निरूपयितं भूमिकामारचयति अथेत्यादिना। नियमविधिस्थले इतरनिवृत्तिस्तु अर्थादायातं न त्वितरनिवृत्तितात्पर्य्येण नियमविधिः प्रवर्तते। "पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ! शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः" इति श्रीमद्वाल्मीकिरामायणे भगवन्तं श्रीरामचन्द्रं प्रति वालिन उक्तौ यत् पञ्चनखस्य भक्ष्यत्वं कृत्यप्रत्ययविधिना प्रतिपादितं तस्य नियमविधित्वे शल्यकाद्यभक्षणे दोषप्रसक्तेः प्रकरणस्याभक्ष्यनिरूपणरूपत्वावगमेन तद्बाधापत्तेश्च। अतएव पञ्चपदसार्थक्यम्। अन्यथाऽपञ्चनखव्यावृत्त्यर्थकत्वे पञ्चपदवैयर्थ्यापत्तेः श्वादिपञ्चनखभक्षणे दोषाप्रसक्त्या तत्र प्रायश्चित्तविधानानुपपत्तेश्च। इतश्च नियमविधावघाताधीनं वैतुष्यं शास्त्रार्थः। तस्यादृष्टजनकत्वादित्यवधेयम्। अतएव नियमे उपायान्तरालम्बनस्य शास्त्रार्थत्वादेव। अशास्त्रार्थे न नियम इति। मिलितशशकमार्जारादिमांसभक्षणस्याशास्त्रार्थत्वान्न तत्र नियमः। पञ्च पञ्चनखभक्षणविधे-

रितरनिवृत्तिफलकत्वेन परिसंख्या युक्ता नियमेनेतरनिवृत्त्यसम्भवादितितात्पर्य्यम्। अतएव नियमेनेतरनिवृत्त्यसम्भवादेव। दोषत्रयदुष्टोऽपीति। "श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका॥" स्वार्थत्यागः, परार्थस्वीकारः प्राप्तबाधश्चेति त्रयो दोषाः। यथा तत्राश्वाभिधानीमादत्त इतिवाक्येऽनेन मन्त्रेणाश्वरशनादानं कुर्य्यादिति स्वार्थः, स च परित्यक्तः, गर्द्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः, गर्द्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्यानेन बाधश्चेति त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता। गत्यन्तरे सति सा न युक्ता। इतरनिवृत्तिपदाभावेन लाक्षणिकत्वादित्यर्थः। आद्यं दोषद्वयं शब्दनिष्ठं प्राप्तबाधश्चार्थनिष्ठ इति संक्षेपः। श्रौतीलाक्षणिकीभेदेन द्वैविध्यमपि ज्ञातव्यम्। शशकादिमांसासम्बलितेति। केवलमार्जारादिनिषिद्धमांसभक्षणनिषेधे सार्थक्यं प्रायश्चित्तविधीनां न तु मिलितमांसभक्षणे इत्यर्थः। शिष्टाचारादिविरोधादिति प्रपञ्चितं ग्रन्थकृता। निर्धारणसप्तमीबलादिति। मनुवचने "पञ्चनखेषु" "शशकादयः पञ्च भक्ष्या" इति सप्तम्या निर्धारणार्थकत्वादिति। निर्धारणञ्च जात्यादिविशेषणविशिष्टयद्धर्मावच्छिन्नस्य तादृशविशेषणशून्यतद्धर्मावच्छिन्नव्यावृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनम्। प्रकृते च शशकत्वादिभक्ष्य (पञ्च पञ्चनखत्व) जातिविशिष्टे पञ्चनखत्वादौ शशकत्वादिजातिशून्यपञ्चनखव्यावृत्तत्वेन भक्ष्यत्वविशेषादिरूपविधेयसम्बन्धोऽभिप्रेत इति पञ्चनखपदात् सप्तमीत्यर्थः। अपदार्थस्येति। शशकादिभिन्नपञ्चनखे गृहीतव्यापकताकशशकाद्यभेदाभावस्यापदार्थत्वादिति। वस्तुतस्त्विति। उद्देश्यतावच्छेदकविधेयसम्बन्धयोरेव व्याप्यव्यापकभावस्य संसर्गमर्य्यादया भानस्य व्युत्पत्तिसिद्धत्वान्नापदार्थस्य तथा भानम्। शशकादिभिन्नपञ्चनखत्वादिकं च नोद्देश्यतावच्छेदकम्।

मनुवचने पञ्चनखेष्विति निर्धारणसप्तम्या शल्लकादिपञ्चभिन्नपञ्चनखानां भक्षणस्य प्रत्यवायहेतुत्वमित्यर्थे क्लृप्तत्वादिति जगदीशभट्टाचार्य्या अपि शब्दशक्तिप्रकाशिकायामाहुः। एवं याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादावपि लिङः परिसंख्येवार्थः। तेन याजनादिभिन्नैर्ब्राह्मणस्य धनार्जनं प्रत्यवायहेतुरिति वाक्यार्थः। "न कृष्याद्यैरनापन्नो ब्राह्मणो धनमर्जयेदित्यादिवचनैरुपायान्तरेण विप्राणां धनार्जनस्य प्रत्यवायहेतुत्वस्य स्फुटत्वात्। विध्यर्थवैयर्थ्यभयादाह अथवेति। अतएवेति। विध्यर्थबोधकतया लिङादेः साधुत्वनिर्वाहादेव स्वार्थहान्यादिदोषत्रयस्थले नियमविधिनोपपत्तिसम्भवे न तदादरः परिसंख्यादरः। अनायत्या परिसंख्यास्वीकारस्य युक्तत्वादिति। द्वितीयोऽतएवेति। परिसंख्याया अनादरादेवेत्यर्थः। अत्राहुः। याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यत्र नियमविधिरेव। यत्र क्रियायां विकल्पेन कारकान्वयः स नियमः। समुच्चयासम्भवस्थले नियमविधेः स्वीकारात्। तदेतन्मतं वाचस्पतिमिश्रसंवादेन द्रढ़यति। अतएवेति। यथा धनार्जने याजनप्रतिग्रहाभ्या-

मेकस्यार्जनस्यासम्भवादेकस्यां धनार्जनक्रियायां याजनादीनां मिलितानामन्वयस्यासम्भावितत‌या विकल्पेनैवान्वयः। शशकादिमांसनिर्मितस्यैकस्य पिण्डस्य सम्भवात् भक्षणक्रियायां मिलितानामन्वयसम्भव इतिपरिसंख्येति भेदः। शब्दशक्तिपकाशिकाकृतस्तु अत्र याजनाद्यैर्ब्राह्मणो धनमर्जयेदेवेति न नियमविधिः। याजानादिना धनानर्जने ब्राह्मणस्य प्रत्यवायाश्रुतेरित्याहुः। केचित्तु इतरव्यवच्छेदस्य आर्थत्वशाब्दत्वाभ्यां नियमपरिसंख्ययोर्भेदः। तथाहि याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादौ वित्तार्जने उपायत्रयसम्बन्धस्य शब्दात् प्रतीतौ कृष्यादीनामन्वयोऽर्थात् सिध्यति। येषामेकान्वयेऽपरान्वयस्तेषां समुच्चयासम्भवात् तत्रेतरोपायव्युदासे शब्दतात्पर्य्यं कल्प्यते। परन्तु धूमोऽस्तीति वाक्ये वह्नेरिव तस्यार्थत्वम्। परिसंख्यायां त भक्षणक्रियायां पञ्चानामप्यन्वयसम्भवादितरपञ्चनखव्युदासो नार्थः। तत्र पञ्चानामपि समुच्चयसम्भवात्। किन्तु शाब्दः। एवं च भक्ष्यपञ्चनखपदविरोधिलक्षणया पञ्चेतरपञ्चनखा न भक्ष्या इति वाक्यार्थः। तथाचोपस्थितपदार्थपरित्यागादनुपस्थितपदार्थकल्पनादभावविधित्वाच्च नियमापेक्षया दोषत्रयवती परिसंख्या युक्तेत्याहुः। इदन्तु चिन्त्यत इत्यादि। केवलमनिष्टाननुबन्धिधनार्जनस्यैवोद्देश्यत्वात् तस्य च वैश्यादिकर्तृकानिषिद्धधनार्जनसाधारण्याद् विध्यर्थाख्यातार्थस्य बलवदनिष्टाननुबन्धित्वस्य कृतावन्वयमते तादृशानिष्टाननुबन्धिकृतिविषयार्जनमेव याजनादिकरणोद्देश्यमुपगन्तव्यमिति कृतेर्विशेषणतया भानं न सम्भवति। कर्त्राख्यातस्थले तादृशकृतेर्विशेष्यतया भानात्। परस्परं व्यभिचारादिति। याजनेनार्थार्जनाभाववति ब्राह्मणेऽध्यापनेन चार्थार्जनवति व्यभिचारात्। एवं परस्परव्यभिचारो बोध्यः। नियमपक्षेऽवघातेनैव वैतुष्यं कार्य्यमितिवद् याजनाध्यापनप्रतिग्रहै मिलितैरेव ब्राह्मणो धनमर्जयेदिति नियमः स्यात्। अन्यतमकरणत्वत्वेन व्यापकत्वसत्त्वेऽपि विधिवाक्ये तस्यानुक्तत्वान्न तल्लाभसम्भवः। तादृशान्यतमत्वस्य विधेयानवच्छेदकत्वात्। विधेयतावच्छेदकत्वं च याजनत्वाध्यापनत्वप्रतिग्रहत्वैत त्रितयमेव। अन्यतमत्वाघटितेन त्रित्वेन रूपेणापि न व्यापकतावच्छेदकता। त्रित्वस्य व्यासज्यवृत्तितया तत्पर्य्याप्त्यधिकरकरणत्वस्य प्रत्येकमसत्त्वेनाप्रसिद्ध्या व्यापकत्वस्यासम्भवादिति मूलमेव सुगमम्। तथा वोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्य्याप्तेरेव त्रित्वादिसम्बन्धत्वं वाच्यम्। तादृशव्याप्यत्वस्य प्रत्येकवृत्तितया न समुदाये व्यापकताबोध इतिभावः। यद्यपि व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबुद्धौ स्वव्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतया भासते, व्याप्यत्वं च तद्वदन्यावृत्तित्वमिति व्युत्पत्तिरस्ति तथाप्यत्र त्रित्वादेरनुल्लेखात् तद्भानं न सम्भवत्येव। पर्याप्तिश्चामेको घटः अयमेको घटः इमौ द्वौ इत्यादिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः।

अन्यतमकरणकत्वेनेति। अत्रेदं चिन्त्यते। अन्यतमत्वस्याने भेदावच्छिन्नप्रतियोगिताक-भेदत्वेनात्र तथाविधत्रित्वरूपानेके तस्य सत्त्वात् यथा व्यापकत्वं वर्तते तथाऽन्यतमत्वत्वेन विधेयतानवच्छेदकत्वेऽपि तादृशान्यतमघटकयाजनत्वादेर्विधेयतावच्छेदकत्वे न काचिदनुपपत्तिरिति तथाविधवाक्यादलाभेऽपि न क्षतिः। व्युत्पत्तिवैचित्र्यादिति। बहुत्वस्याश्रयता-मात्रसम्बन्धप्रयोजकत्वमिति व्युत्पत्तेः। ब्राह्मणो धनमर्जयेदित्यादौ परिसंख्यैव किन्तु यदि-शब्दप्रयोगाधीनो नियमविधिरपीति केचित्। यदि ब्राह्मणो धनमर्जयेत् तदा याजनाद्यन्य-तमेनेति। अत्रापि गृहस्थो ब्राह्मण इति वक्तव्यम्। अन्यथा निष्पृहस्य यतिनो धनमर्जये-दिति विधिलङ्घने दोषः प्रसज्येत। परिसंख्या फलस्येति। ऋतुभिन्नकाले भार्य्यागमने प्रत्यवायश्रुते नयिं परिसंख्याविधिरित्युपरिष्टात् प्रपञ्चयिष्यते। नच ऋतौ भार्य्यामुपेयादिति परिसंख्येव स्वीकर्तव्या। तेनानृतौ भार्य्यां नोपेयादितीतरनिवृत्तिलाभात्। अनृतावभि-गमनस्य चेन्द्रियार्थेषु सर्वेषु न प्रसज्येतकामतः इत्यादिनिषेधैकवाक्यत्वाच्चेति चेन्न "ऋतुस्नातां तु यो भार्य्यां स्वस्थः सन् नोपगच्छति। घोरायां भ्रूणहत्यायां पतते नात्र संशयः॥" इति पराशरवचने ऋतावनभिगमने दोषश्रवणात्। 'ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा। पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया॥' (३।४५) इति मनुवचनव्याख्यानावसरे कुल्लूकभट्टेन "तस्माद् विधित्रयम् ऋतावुपेयादनृतावपि भार्य्याप्रीतये गच्छेत्। ऋतुकालाभिगामी स्यादित्ययं नियमविधिर्नतु परिसंख्या स्वार्थहानिपरार्थकल्पनाप्राप्तबाधात्मकदोषत्रयदुष्टत्वा-दित्यभिहितत्वाद् "ऋतवुपेयादनृतौ पर्ववर्जमिति" गौतमवनाच्चानृतुगमने दोषाश्रुतेरनृतौ भार्य्यागमननिषेधार्थकत्वलाभे प्रयोजनविरहात्। एवञ्च ऋतौ स्वभार्य्यामुपेयादेवेत्यादौ सप्तम्या अवच्छेद्यत्वमर्थः। एवार्थश्चायोगव्यवच्छेदः। विध्यर्थश्चेष्टसाधनत्वम्। इष्टं च प्रत्यवायाभावरूपम्। द्वितीयार्थः कर्मत्वम्। तथाच ऋतुकालावच्छिन्नस्वभार्य्याकर्मका-भिगमनायोगव्यवच्छेदः प्रत्यवायाभावसाधनमित्यन्वयबोधः। अत्र यस्यायोगव्यवच्छेदः प्रत्यवायाभावहेतुत्वेन विधिबोधितः स प्रत्यवायजनकाभावप्रतियोगीति व्याप्तिस्वीकारेण तादृशाभिगमनाभावस्य प्रत्यवायहेतुत्वसिद्धिः। अतएवेति परिसंख्यापक्षे दोषत्रयदुष्टत्वा-देवेत्यर्थः। लक्षणेति। पार्थ एव धनुर्धर इत्यत्र धनुर्धरे पार्थान्ययोगव्यवच्छेदबोधनाद् धनुर्धरपदस्योत्कृष्टधनुर्धरे लक्षणावदिति। पार्थान्यस्मिन्नुत्कृष्टधनुर्धरत्वं व्यवच्छिद्यतेत्यर्थः। तदेतदग्रिमग्रन्थे स्फुटीभविष्यतीतिदिक्।

शब्दशक्तिप्रकाशिकाटीकाकृतस्तु "अत्र नियमार्थैकदेशे अभावे ऋत्वादिकालस्यावच्छेद-कत्वेनान्वयात् ऋतुकालावच्छेद्यत्वविशिष्टस्य प्रत्यवायजनकीभूताभावस्य प्रतियोगिस्वदारगमन-

विधिबोधिनी

मित्याकारको बोधः। यद्वा प्रत्यवायहेतुत्वम् अभावश्च द्वयं तत्र लिङर्थः। तेन प्रतियोगिविधया धात्वर्थस्यावच्छेद्यत्वेन च कालस्यान्वयिन्यभावे लिङा प्रत्यवायहेतुत्वस्य बोधनात् ऋतुकालावच्छेद्यः स्वदारगमनाभावः प्रत्यवायहेतुरित्याकार एव तत्र बोध इत्याहुः। तेन सिद्धं नियमविधित्वम ऋतौ स्वभार्य्यामुपेयादितिविधिवाक्यस्य।

गादाधरी

न च ऋतावनभिगमने प्रत्यवायश्रुतेः ऋतुकालाभिगमनस्यावश्यकत्वे तत्तात्पर्य्यमावश्यकमिति तत्र नियम इति वाच्यम्। अनृतावभिगमनस्यापी"न्द्रियार्थेषु सर्वेषु न प्रसज्येत कामत" इत्यादिनिषेधात् तदेकवाक्यतया परिसंख्याया अपि औचित्यादिति चेम्न। येन रूपेणोद्देश्यता तदन्यरूपव्यापकता उद्देश्य-विधेयभावमर्य्यादातो न लभ्यते इति पञ्च पञ्चनखान् भुञ्जीतेत्यादावुद्देश्याविशेषणभक्ष्यपञ्चनखत्वादौ शशकाद्यभेदव्याप्त्यलाभ इत्याशयेन तत्र परिसंख्यायां स्वार्थहान्यादिदोषस्य प्राचीनैरभिधानात्। अतएव शिरोमणिभट्टाचार्य्यैरेवकारार्थविचारे इह भवने मैत्रेणैव पक्ष्यते तेमनमित्यत्र तेमनकर्मकपाकत्वेन पाकानुपस्थित्या तद्रूपस्योद्देश्यतावच्छेदकत्वासम्भवात्, एतद्भवनवृत्तित्वविशेषिततद्रूपावच्छेदेन मैत्रान्यकर्तृकत्वव्यवच्छेदबोधसम्भवात् मैत्रान्यस्मिन्नेतद्भवनाधिकरणकतेमनकर्मकपाककर्त्तृत्वव्यवच्छेदबोधाय एवकारस्य लक्षणा कृता। प्रकृते च लक्षणोपगमे स्वार्थपरित्यागो ध्रुवश्च, ऋतौ स्वदारान् गच्छेदित्यादौ यद्यपि लिङर्थबलवदनिष्टाननुबन्धित्वविशेषितभार्य्याभिगमनत्वानाभिगमत्वस्य भानात् तद्रूपस्य कालविशेषसम्बन्धोद्देश्यतावच्छेदकत्वं सम्भवतीति तद्रूपे ऋतुकालसम्बन्धव्याप्तिलाभः सम्भवति, तथापि पचति चैत्रो गच्छतीत्याद्यप्रयोगादाख्यातार्थस्य विधेयतयैव भानं न तूद्देश्यतावच्छेदकतयेति व्युत्पत्तेर्बलवदनिष्टाननुबन्धित्वरूपलिङर्थस्य नोद्देश्यतावच्छेदकत्वं व्युत्पत्तिसिद्धमित्यालोच्य-तत्र परिसंख्या नादृता, किन्तु ऋतुकालेऽभिगमनियम एव। अथ ऋताविति वाक्यात् तत्कालेऽभिगमननियमबोधनोऽपि तत्-

गादाधरी

कालीनानभिगमनेऽनिष्टसाधनत्वाबोधकतया तादृशविधिवाक्यात् (वाक्यं) ततकालाभिगमने प्रवृत्तिनियमं नोपपादयतीति तस्य नियमविधित्वं दुर्घटमिति चेन्न। तादृशवाक्यस्य तत्कालीनाभिगमने नरकाभावरूपेष्टसाधनताबोधकत्वोपगमनोत्तरकालमर्थतस्तत्कालप्रत्यासन्नस्याभिगमनाभावस्य नरकसाधनत्वबोधात् तत्कालीनाभिगमे नियतप्रवृत्त्युपपत्त्या तद्वाक्यस्य नियमविधित्वोपपत्तेः। सन्ध्यामुपासीतेत्यादिनित्यविधीनां क्रियासु नरकाभावसाधनताबोधकतया उक्तरीत्या तत्र नियमप्रवृत्तिसम्पादकत्वेऽपि न तेषां नियमविधित्वं, विधिं विनापि यादृशक्रियायां रागादितः प्रवृत्तिसम्भवस्तत्र प्रवृत्तिनियमोपपादकविधेरेव नियमविधित्वात्। परन्तु सन्ध्यावन्दनादावन्यतः प्रवृत्त्यसम्भवात् तद्विधायकवाक्यानामपूर्वविधित्वमेव।

विधिबोधिनी

स्वमते नियमविधित्वमुपपादयति "विधिं विनापी"ति। यादृशक्रियायां रागदितः प्रवृतिसम्भव इति। ऋतौ भार्य्यामुपेयादिति विधिं विनापि रागत एव भार्य्याभिगमने प्रवृत्तिसम्भवात् नखविदलनादिद्वारा वैतुष्यीकरणेऽपि रागादितः प्रवृत्तिसम्भवाच्च पक्षे पर्ववर्जे ऋतौ स्वभार्य्यामुपेयादेवेति नियेमविधेरेव युक्तत्वाद् वैतुष्यस्यावघातनियमवत्। तत्तत्तापूर्वजनकत्वबोधनादिति भावः। विशेष्य इति। न्यायनये प्रथमान्तमुखविशेष्यकशाब्दबोधादितिभावः।

पुनर्विधिवाक्यशेषमुत्थाप्य तस्य कीदृशं विधित्वं तद् विचारयति कार्त्तिक्यादौ हविष्यं भुञ्जीत्यादिविधेः पूर्वं रागतो दुग्धादिरूपहविष्यभोजने प्राप्तत्वान्नापुर्वविधित्वम्। प्रमाणान्तरेणाप्राप्तप्रापकस्यैव विधेस्तथात्वात्। अप्राप्तप्रापकत्वंच प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वं प्रमाणान्तरजन्यप्रतीत्यविषयविषयकप्रतीतिजनकत्वं वा। तस्य च हविष्यभोजनस्य रागत एव पूर्वं प्राप्तत्वान्नापूर्वविधित्वम्। अकरणे प्रत्यवायस्याप्रामाणिकत्वान्न नियमविधिः। नापि परिसंख्याविधिः। "हविष्यं ब्रह्मचर्य्यं च महापातकनाशनमि"तिवचनबलात् कामनावत एव हरिष्येतराभोजने प्रवृत्तिसम्भवात्। कामनारहितेन तत्र प्रवृत्तेरसम्भवात् किन्तु काम्योऽभावविधिरेव। नन्वेवं भुञ्जीत पितृसेवितमित्यपि विधिर्हविष्यान्नं भुञ्जीतेतिवदभावविधिरेव किं न स्यादित्यत आह "भुञ्जीत पितृसेवितमि"ति। श्राद्धनिवेदिनजातीयेतरेति। "भक्ष्यं भोज्यं तथा पेयं यत्किञ्चित् पच्यते गृहे। न भोक्तव्यं पितॄणां तदनिवेद्यं कथञ्चन। यत्किञ्चित्

पच्चये गेहे भक्ष्यं भोज्यमथापि वा। अनिवेद्य न भुञ्जीत पिण्डमूले कथञ्चन"। इति यमशङ्खाभ्यां (तद्दिने तद्गेहे सर्वपाकस्यैव पितृनिवेदितरूपेण भक्षयत्वविधानात्) पितृसेवितमेव भुञ्जीतेत्यवगभात् तदेकवाक्यतया श्राद्धनिवेदितजातीयेतरद्रव्यनिषेधैकवाक्यतया च परिसंख्या-विधिरयमिति शूलपानिः। तथा च श्राद्धविवेकेऽथश्राद्धशेषभोजनमित्युपक्रम्य देवलः पश्चात् स्वयं पत्नीभिः पिण्डशेषमुदाहरेत्। उदाहरेदभ्यवहरेत्। उशनाः तैरनुज्ञातः पिण्डशेषमिष्टेभ्यो दद्यात् स्वयं वा भुञ्जीत। वाशब्दः समुच्चये। शेषप्रश्नानन्तरम् इष्टेः सह भुङ्क्षेति ब्राह्मणप्रति-वचनस्य गरुड़पुराणेऽभिहितत्वात् तदेकवाक्यतया समुच्चय एव वा शब्दार्थो न तु विकल्पोऽष्टदोष-ग्रासादिति तर्कालङ्काराः। अस्य विधेर्नियमविधित्वमेवेति मतमुत्थापयति। वस्तुतस्त्विति। प्रदक्षिणमुपव्रज्य भुञ्जीत पितृसेवितमिति याज्ञवल्क्यवचनैरितिकर्तव्यतासंदंशेनेति। इतिकर्तव्यतात्वं च कथम्भावाकाङ्क्षापूरकत्वम्। सन्दंशश्च एकाङ्गानुवादेन विधीयमानयोरङ्ग-योरन्तराले विहितत्वमिति न्यायप्रकाशः। शेषभोजनस्याङ्गत्वमिति। साङ्गाद्धि वैदिककर्म्मणः फलावश्यम्भावनियमाच्छेषभोजनस्याङ्गत्वे तदकरणे श्राद्धफलं न स्यादेवेति भावः। विनियोगविधिप्रभेद इति। अङ्गानां प्रधानैः सह सम्बन्धस्य बोधको विधिविशेष इत्यर्थः। दुरपवादमिति दुष्परिहरमित्यर्थः। ननु पितृसेवितं भुञ्जीतेति न भोजनस्वरूपबोधकोऽ-पूर्वविधिः। भोजनस्य रागप्राप्तत्वात्। न च परिसंख्या विधेया पितृसेवितेतरन्न भुञ्जीतेत्येव लक्षणा। सा च स्वार्थहान्यादिदोषत्रयदुष्टा। नियमविधिनागतौ सम्भवन्त्यां दोषत्रयमभ्युपगन्तुं युज्यते। अतएव ऋतुकालाभिगामी स्यादितिवन्नियमविधिरेव मनुवचने उक्तः। मनुवचनेन "एते भक्ष्या" इत्यनेन विधिसिद्धौ यत् पञ्चनखग्रहणं तत्र परिसंख्यार्थमुक्तं पञ्चनखेष्विति-निर्धारणसप्तमीबलात् अत्र परिसंख्यायाः प्रमाणाभावान्नियमविधिः। पितृसेवितं भुञ्जीतै-वेत्यर्थः। न च दृष्टार्थे कर्मणि वचनशतेनापि नियमो बोधयितुं शक्यते। अतः श्राद्धाङ्ग-तयाऽदृष्टार्थोऽयं नियमः। तथाचोपवासवासरेऽपि श्राद्धकरणे शेषभोजनप्रसङ्गः। किञ्चामा-वास्याष्टकादावपि मांसशेषभोजनमिष्टं स्यात्। मांसव्यतिरिक्तभोजनेऽपि न शेषशब्दार्थहानिरिति चेन्न। सर्वस्मात् ग्रासावरार्धमश्नीयादित्यापस्तम्बवचनेन बहुकृत्स्नवाचकसर्वशब्दश्रुतेः। अमावस्या-ष्टकादौ श्राद्धशेषमांसभोजनमिष्यत इति चेन्न पर्वसु तद्भक्षणनिषेधात्। दृष्टार्थभक्षणविषयो निषेधविधिर्भविष्यति। हिंसानिषेधविधिरिवादृष्टार्थयागादिपशुहिंसाव्यतिरिक्तविषय इति चेन्न। यावज्जीवनिरामिषप्रतिज्ञायामपि मांसशेषभक्षणप्रसङ्गात्। तेन मांसं श्राद्धे न देयमिति चेन्न मांसाष्टकायां मांसस्य प्राधान्यात् तदसम्भवात्। साग्नेरमावास्याश्राद्धे तदा-मिषेण कर्तव्यमिति मनुवचनाद्दर्शे चौपवसथिकमन्नं दम्पती भुञ्जीयातामितिगोभिलोक्तभोजने

विधिबोधिनी

नियमदर्शनाच्च। तन्न समीचीनम्। प्रागुक्तयमशङ्खवचनाभ्यां तद्दिवसे तद्गेहे सर्वपाकस्वयै पितृनिवेदितत्वेन भक्ष्यत्वविधानात् पितृसेवितमेव भुञ्जीतेत्यवगमात् नतु पितृसेवितं भुञ्जतैवेत्यबोधनात् तदेकवाक्यतया पितृसेवितातिरिक्तं न भुञ्जीतेति बोधनात् परिसंख्यैव विधिः स्वीकर्तव्या। नियमविधौ मूलभूतश्रुतिभेदकल्पनाप्रसङ्गात्। अस्तु वा नियमविधिः। तथापि भक्षणस्योपयुक्तशेषप्रतिपत्तिरूपत्वात्। प्रतिपत्तेश्च सत्यवशेषेऽङ्गत्वविधानात्। यदि श्राद्धमिष्टभोज्यं निष्पाद्य न किञ्चिदवशिष्यते तदा भक्षणरूपप्रतिपत्त्यनुरोधान्न शेषं स्थाप्यम्। न हि प्रतिपत्तिः प्रतिपाद्यं प्रयोजयति। प्रतिपाद्यगुणभूतत्वात् प्रतिपत्तेः। गुणस्य च प्रधानाप्रयोजकत्वात्। अतएवाग्निषोमीये पशौ शकृन्निरस्यति लोहितं निरस्यतीत्यादीनामुपयुक्तशेषप्रतिपत्तिरूपाणां दैवाल्लोहितादीनां विनाशे लोहिताद्यर्थं पश्वन्तरालम्भनप्रयोजकत्वं निरस्तम्। एवं भक्षणरूपास्याङ्गस्य हानिः स्यादिति चेन्न यदिकारारोपेणाङ्गत्वबोधनात्। यद्यवशिष्येत तदा किं कर्तव्यमित्यपेक्षायां प्रतिपत्तिविधानात्। यदिकारारोपेण च विधानान्नियमविधिरप्युपपन्न इत्येवं श्राद्धविवेककृतः। यदि श्राद्धशेषः स्यात् तदा नियमेन भोक्तव्यमिति नियमविधिः। यदि न स्यात् तदा परिसंख्याविधिरिति हृदयम्।

गादाधरी

अथोक्तरीत्या ऋतावित्यादिविधेः क्रियायां नियतप्रवृत्तिनिर्वाहकत्वे तस्य नियमबोधकत्वं किमर्थमुपेयत इति चेन्नोपेयत एव तथात्वं नियमाबोधकत्वेऽप्यवघातविधिवन्नियमविधित्वसम्भवात्। ऋतौ भार्य्यामुपेयादेवेत्यादिवाक्ये त्वेवकारस्यायोगव्यवच्छेदार्थकतया भार्य्याभिगमे ऋतुकालवृत्त्यभावप्रतियोगित्वव्यवच्छेदरूपव्यापकताबोधस्यावश्यकतया तत्रैव नरकाभावरूपेष्टसाधनतान्वयः।

केचित्तु (ऋतु) कालनिष्ठक्रियाया अयोगे लिङर्थबलवदनिष्टाननुबन्धित्वव्यवच्छेद एवकारेण बोध्यते इत्याहुः।

कार्त्तिकादौ हविष्यं भुञ्जीतेत्यादिर्नापूर्वविधिः, दुग्धादिरूपहविष्यभोजने रागत एव प्रवृत्तिसम्भवात्। नापि ऋतुकालाभिगमनादिविधिवन्नियमविधिरकरणे प्रत्यवायस्याप्रामाणिकत्वात्। नापि परिसंख्याविधिःइ मामगृभ्णन्नित्यादे गर्धभरसनाग्रहणे एतन्मन्त्रस्य सफलत्वज्ञानविरोधितया तत्र तन्मन्त्रपाठाप्रवृत्तिप्रयोजकतावत् प्रकृतस्य हविष्येतरभोजने लौकिकप्रमाणसिद्धफलके सफलत्वज्ञाना-

विघटनेन प्रवृत्तिविरहप्रयोजकताया असम्भवात्। अपितु "हविष्यं ब्रह्मचारित्वं (ब्रह्मचर्य्यं च) महापातकनाशनमित्याद्यर्थवादबोधितफलार्थिनं हविष्येतरभोजनाद्यभावे प्रवर्त्तयन् एकादश्यामुपवसेदिवदभावविधिरेव। न च तद्वाक्यादितरभोजनाद्यभावबोधासम्भवान्न तद्विधित्वसम्भव इतिवाच्यम्। तथाविधविधेरर्थवादेन कल्प्यत्वे हविष्येतरन्न भुञ्जीतेत्याद्याकारकस्यैव कल्पनात्। प्रत्यक्षत्वे पञ्च पञ्चनखानित्यादाविव लक्षणयाभिमतार्थबोधकतया उपपादनीयत्वात्। अर्थवादेऽपि हविष्यादिपदस्य तदितरभोजनाद्यभावे लाक्षणिकत्वोपगमात्। भुञ्जीत पितृसेवितमित्यत्र श्राद्धनिवेदितजातीयेतरद्रव्यभोजननिषेधैकवाक्यतया परिसंख्यामेव स्वीकुर्वन्ति। वस्तुतः "प्रदक्षिणमुपव्रज्य भुञ्जीत पितृसेवितमि"त्यादिवचनैरितिकर्तव्यतासन्दंशेन शेषभोजनविधानात् शेषभोजनस्याङ्गत्वं दुरपवादमिति श्राद्धोपकारकतया तद्विधानेन विनियोगविधिप्रभेदो नियतप्रवृत्तिफलकत्वान्नियमविधिरूपोऽयम्। शेषसत्त्वेनास्याङ्गतेति आवश्यकोपवासादिदिने शेषभोजनमन्तरेणापि प्रधाननिर्वाहस्तत्र श्राद्धे निःशेषान्नमांसादिदानेन श्राद्धशेषभोजनरूपाङ्गस्यानपेक्षानिर्वाहात्। एवमेव श्राद्धविवेककृतः। न च श्राद्धजन्य(परमा)पूर्वे शेषभोजनस्य कारणत्वे कथं तदघटितसामग्रीतः परमापूर्वोत्पत्तिः? कारणत्वाभावे शेषसत्त्वेऽपि तदपेक्षा न स्यात् कथं वा तदङ्गं भवेत्, सावशेषश्राद्धजन्यपरमापूर्वे तस्य कारणत्वोपगमेऽपि निरवशेषश्राद्धजन्यपरमापूर्वसामग्र्या शेषसत्त्वेऽपि तद्भोजनमन्तरेणापि अक्षतत्वात् प्रधानानिर्वाहो दुर्घट इतिवाच्यम्। शेषभोजनवत् शेषाभावस्यापि वैकल्पिकाङ्गत्वेन श्राद्धजन्यपरमापूर्वसामान्योत्पत्तौ शेषाभाव-शेषभोजनरूपाङ्गद्वयान्यतरसामग्र्यपेक्षया सामञ्जस्यात्। न च शेषाभावस्याङ्गताबोधकविध्यभावात् कथं तस्याङ्गतेति वाच्यम्। शेषसत्त्वे किं कुर्वीतेत्याकाङ्क्षया प्रवृत्तस्य शेषान्नं भुञ्जीतेतिविधेः शेषसत्त्वे भोजनापेक्षाबोधकतया शेषासत्त्वे तदनपेक्षाबोधकतया शेषासत्त्वे शेषभोजनं विनैव प्रधानसिद्धिरित्यतल्लाभात्, तत्र शेषाभावस्यानपेक्षायां शेषसत्त्वेऽपि शेषभोजनमन्तरेणापूर्वस्य दुर्वारतया

शेषभोजनविधेस्तत्र नियमेन प्रवर्तकत्वायोगाद् विधिवैयर्थ्येन शेषाभावस्याङ्गतायास्तद्बोधकविधेश्चाक्षेपादुभयस्थलसाधारणः शेषभोजनाभावविशिष्टस्य शेषस्याभाव एवाङ्गम्। भुञ्जीत पितृसेवितमित्यनेन विशेषणाभावरूपस्य शेषभोजनस्य वस्तुगत्या विशिष्टाभावत्वावच्छिन्नं यदपूर्वसाधनत्वं तदेव बोध्यते। तद्रूपस्य जनकतावच्छेदकञ्च व्यभिचारात् शेषभोजनत्वस्य तथात्वबाधात् तदुत्तरकालकल्प्यं, तावता विशेष्याभावस्यापि साधारणरूपेणाङ्गतासिद्धिरित्यप्याहुः।

ईदृशरीत्येव लोहितं निरस्यति शकृन्निरस्यतीत्यादिविधिबोधितलोहितशकृन्निरासात्मकप्रतिपत्तिरूपाङ्गबाधेऽपि लोहित-शकृदाद्यसत्त्वस्थले प्रधानसिद्धिरुपपादनीया। न चाङ्गबाधभयेन लोहिताद्यसत्त्वस्थले लोहिताद्यनन्तरं सम्पाद्यैतन्निरसनं युक्तमिति वाच्यम्। लोहितादिसत्त्वे किं कुर्वीतेत्याकाङ्क्षया तादृशविधीनां प्रवृत्त्या लोहिताद्यसत्त्वस्थले तेषां विधीनामप्रवृत्तेस्तत्र तदङ्गताबोधकाभावात्। एतन्न्यायमूलक एव प्रतिपत्तेः प्रतिपाद्याप्रयोजकत्वमिति प्रवादः।

अथ लौकिकशेषभोजनस्यालौकिकाङ्गत्वे पूर्वदिवसीयनिरामिषसकृद्भोजनस्यापि श्राद्धाङ्गता स्यादिति निरामिषं सकृद् भुक्त्वा इत्यादौ निरामिषसकृद्भोजनातिरिक्तभोजनाभावपरत्वं भज्येतेति चेन्न। पूर्वदिवसे आवश्यकोपवासस्थले आवश्यकश्राद्धस्यानिर्वाहप्रसङ्गेन तत्र वैकल्पिकाङ्गान्तरकल्पने च गौरवेण तद्वचनस्य निरामिषसकृद्भोजनातिरिक्तभोजनाभावरूपाङ्गविधायकतया एवोपगमादिति शिवम्॥

इति श्रीमहामहोपाध्याय-गदाधरभट्टाचार्यविरचितविधिस्वरूपविचारः

सम्पूर्णः॥

विधिबोधिनी

एवं च पूर्वदिवसे निरामिषसकृद्भोजनातिरिक्तभोजनाभावरूपस्य श्राद्धविध्युक्ताङ्गस्य हानिः स्यादिति चेन्न। तदुपपादयति वैकल्पिकाङ्गान्तरकल्पनागौरवेन पूर्वदिवसे निरामिष-सकृद्भोजनातिरिक्तभोजनाभावरूपस्याङ्गबोधकत्वमभ्युपगन्तव्यमिति।

"मङ्गलादीनि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इति नियमादितिशब्देन ग्रन्थसमाप्तिं सूचयन् शिवमितिमङ्गलमप्याचरितं ग्रन्थकृतेति सर्वं निरवद्यमिति।

अथेदानीं ग्रन्थकृता परिहृतोऽधिकारविधिः प्रयोगविधिश्च समासतो निरूप्येते। फल-स्वाम्यबोधको विधिरधिकारविधिः। यत्र विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते सोऽधिकार-विधिरित्यर्थः। यथा स्वर्गकामो यजेतेत्यनेन हि स्वर्गमुद्दिश्य यागं विदधतः स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। फलस्वाम्यत्वस्य कर्मजन्यफलभोक्तृरूपत्वात्। तच्च फल-स्वाम्यं तस्यैव योऽधिकारिविशेषणविशिष्टः। अधिकारिविशेषणंच तदेव यत्पुरुषविशेषणत्वेन श्रुतम्। अतएव "राजा राजसूयेन स्वाराज्यकामो यजेते"त्यनेन स्वाराज्यमुद्दिश्य राजसूयं विद-धतापि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते किन्तु राज्ञः सतस्तत्कामस्य।

अङ्गानां क्रमबोधकविधिः प्रयोगप्राप्तभावबोधको विधिर्वा प्रयोगविधिः। प्राप्तभावः शैघ्र्यम् असम्बन्धिपदार्थाव्यवधानरूपमित्यर्थः। सचाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव। सहि साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्य्यायं प्रयोगप्राप्तभावं विधत्ते। अङ्गक्रमबोधकत्वस्य तथात्वे क्रमो नाम विततिविशेषः। पौर्वापर्य्यरूपो वा। तत्र क्रमे श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्त्याख्यानि षट् प्रमाणानि। अत्रापि पूर्वपूर्वस्य प्राबल्यमुत्तरोत्तरस्य दौर्बल्यम्। यथाऽग्निहोत्रं जुहोति, यवागूं पचतीत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमं त्यक्त्वाऽर्थक्रमः स्वीकर्तव्यः। तेन पूर्वं पाकः पश्चाद्धोमः।

इत्येवं श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिक्रमैरेव कर्मानुष्ठानमन्यथाऽक्रमेणानुष्ठाने वैगुण्य-मित्यलम्। प्रपञ्चस्तु तत्तद्ग्रन्थेऽनुसन्धेयः। ॐतत्सदिति।

शाके नभोऽङ्कवसुचन्द्रमिते च राधे
पक्षे सिते दहनपक्षदिने दशम्याम्।
संख्यात्मिका श्रुतिविधौ विधिबोधिनी या
सैषा समाप्तिमगमद् विबुधप्रसादात् ॥१॥
श्रीमातापितरौ ब्राह्मीं ग्रन्थकर्त्तॄन् गदाधरान्।
तार्किकांश्च गुरून् नौति यादवेन्द्रो नयान्वितः ॥२॥
यस्य प्रसादमासाद्य मूको वाचस्पतीयते।
नमामि परमानन्दं माधवं भक्तवत्सलम् ॥३॥

इति श्रीयादवेन्द्रनाथरायदेवशर्मन्यायतर्कतीर्थविरचिता
विधिबोधिनीसमाख्या विधिस्वरूपविचारव्याख्या
समाप्ता ॥०॥

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१	१६	ग्रन्थकृते	ग्रन्थकृतो
२	५	कृस्नमेव	कृतस्नमेव
,,	७	शदः	शब्दः
,,	१०	वातस्यायन	वात्स्यायन
,,	११	वातस्या	वात्स्या
,,	२०	प्रवृर्तक	प्रवर्तक
,,	२१	कर्मोतपत्ति	कर्मोत्पत्ति
३	१८	वाक्यासंग्रहात	वाक्यासंग्रहात्
४	३	दशितरीत्या	दर्शितरीत्या
,,	४	कमत्वं	कर्मत्वं
५	४	प्रवतक	प्रवर्तक
,,	८	प्रसङ्ग	प्रसङ्गः
६	८	ह्यभियक्तोक्ते	ह्यभियुक्तोक्तेः
,,	१३	धातूपन्थाप्यार्थे	धातूपस्थाप्यार्थे
७	१२	सम्बधेनैवाभावे	सम्बन्धेनैवाभावे
,,	१६	क्रियाकर्य्यतामात्रस्य	क्रियाकार्य्यतामात्रस्य
८	१२	स्तुण्डुलादि	स्तण्डुलादि
,,	१३	विषस्त्रिधेति	विषयस्त्रिधेति
,,	१५	वानुयव्यसाय	वानुव्यवसाय
,,	,,	न त	न तु
,,	१८	ज्ञानाथीना	ज्ञानाधीना
,,	२०	वच्छेदककत	वच्छेदकत्व
११	१९	अनुत्पत्ति	अनुत्पत्तिं

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१२	१०	प्रत्यावायोऽपि	प्रत्यवायोऽपि
,,	२२	श्रयमाणस्य	श्रूयमाणस्य
,,	२३	ग्रहण	ग्रहणे
१४	२३	क्षेमसाधारणम	क्षेमसाधारणम्
१५	२२	रभेदस्यावच्छद्या	रभेदस्यावच्छेद्या
१६	६	द्वेष	द्वेषं
१७	५	जयन्तीवतादितः	जयन्तीव्रतादितः
१८	१०	नित्यकर्मकारणात्	नित्यकर्मकरणात्
,,	२६	र्नपि विरक्ताधः	र्न विरोधः
२०	१७	कामकतव्यता	कामकर्तव्यता
२३	५	सवत्राभाव	सर्वत्राभाव
२४	४	व्युतुन्नत्वा	व्युतुपन्नता
४३	७	यदिचावघातनियविधे	यदिचावघातनियमविधे
४३	२७	पर्य्याप्तिश्चामेको	पर्य्याप्तिश्चायमेको
५०	१७	ऋतवुपेयाद	ऋतावुपेयाद
,,	२२	व्यप्तिस्वीकारेण	व्याप्तिस्वीकारेण
५१	४	नियमविधित्वम	नियमविधित्वम्
५४	२	स्थर्य्ये	स्थैव
,,	२८	र्गर्धभ	र्गर्द्दभ
५५	१६	पूर्वोतपत्ति	पूर्वोत्पत्ति
५६	५	तदरूपस्य	तद्रूपस्य

अन्यानि चेदशुद्धानि दृश्यन्ते तानि कृपया सहृदयैः पाठकैः संशोध्यानि ।